परावनत्या मलिनीकृताः श्रियः ।" इति वनेचरं प्रति पार्थस्य प्रत्युक्तौ । हन्तेदानीं दशाविपर्य्यासेन महान् भावविपर्य्ययोऽप्यस्माकं सञ्जातः । दासत्वोपहतोक्तिना-मस्मद्देशीयानां शिक्षितानां कः पुनरिदानीं वदेत् "कथं प्रसह्याहरणैषिणां प्रियाः परावनत्या मलिनीकृताः श्रियः ॥"

"परोपकारिता"

परोपकरणन्नाम परेषां दुःखविमोचनं' दयापरवश एव लोकस्तदनुतिष्ठति। हृदयवतां महात्मनां हृदि दया हि पुनः कथमुपजायते, न पुनरन्यत् किमपि निदानमिह लभ्यते । केवलमीदृशीम् अवस्थामापन्नश्चेदहं तर्हि मे का गतिर्भवेत् इति चिन्तयन्नेव पूतभावो महामतिः पराननुकम्पते । इह जगति केचन सन्तो निःस्वार्थमपरे केचन स्वार्थसिद्धिमनुसन्धाय परानुपकुर्व्वन्ति । किन्तु ये स्वार्थसिद्धिमननुसन्धाय परोपकारव्रतेन जीवनं यापयन्ति त एव खलु सुमनसः । इतरे च मध्यमा इति कवयः कीर्त्तयन्ति । तथाहि—

"ते वै सत्पुरुषाः परार्थघटकाः स्वार्थस्य बाधेन ये, तेऽमी मानुषमध्यमाः परहिताः स्वार्थाविरोधेन ये । ते वै मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये, ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥"

विनश्वरमिदं शरीरं परिगृह्य नरकपेया-धरामवतरद्भिरिह परत्र च "परोपकारो हि परमो धर्म्मः" इत्यङ्गीक्रियते । सन्तः परानुपकृत्यैव जीवनमिदं सार्थकं मन्यन्ते । धर्म्मसञ्चयाय यावन्ति वर्त्मानीह वर्त्तन्ते, परोपकारो हि तेषामेकं प्रशस्ततमं वर्त्म । परोपकारिण एव संसारेऽस्मिन् साधुनाम्ना परिगीयन्ते । मृता अपि ते अमरा इव विराजन्ते । किं बहुना भगवतो मङ्गलकरनामनिकरेण समं परोपकारिणां ऋतुपर्णनलयुधिष्ठिर-प्रभृतीनां तथा पुराणप्रख्यातानां कुन्तीदमयन्ती-प्रमुखाणां अनेकासां योषितामपि पुण्यश्लोकानाम् अद्यापि नामानि संकीर्त्य शर्व्वरीं सुप्रभातां मन्यन्ते मानवाः ।

तथाहि—अथैकदा प्रातःस्मरणीया कुन्तीदेवी पुत्रपञ्चकमात्रसहाया जगत्कारणस्य भगवतो विष्णोः प्रसादाज्जतुगृहतो निर्व्विघ्नं निःसरन्ती दुर्म्मतेर्दुर्य्योधनस्य पुनरागमनभिया स्वराज्यं परित्यज्य वनं प्रतस्थे, क्रमेण सा वनमतीत्य एकचक्राभिधाम् नगरीमाससाद । आसाद्य च नगरीं तत्र कस्यचित्

ब्राह्मणस्य गृहे आश्रयमुपलेभे। अथ तस्मिन् स्थितवती ब्राह्मणयोरार्त्तरवम् आकर्णितवती। दयार्द्रहृदया कुन्तीदेवी तत्कारणमन्विष्यन्ती क्रमेण अश्रौषीत्, यत् कश्चित् बकनामा राक्षसः नगरवासिनां अपत्यं प्रत्यहमेकैकशः पर्य्यायक्रमेण खादति। अद्य खलु तयोरेकमात्रपुत्रयोर्नियमवशात् राक्षसाय पुत्रार्पणवारः समापतितः। इदमाकर्ण्य कुन्तीदेवी पुत्रानाहूय तत्प्रतिकाराय समादिदेश। अथ तेषां पाण्डवानां भीमः पार्थिवशरीरस्य अकिञ्चित्करतामनुचिन्तयन् प्रथममकथयत्। मातः अहमेव आत्मविनिमयेन ब्राह्मणपुत्रं रक्षिष्यामि। श्रुत्वैतत् कुन्तीदेवी साधुवादेन भीममभिनन्दयन्ती ब्राह्मणतनयविनिमयेन द्वितीयकृतान्तस्येव राक्षसोमुखे तं प्रेरितवती। इत्थं बहुशः परदुःखकातरा आत्मानमनयासमुत् सृजन्तः जगत्यस्मिन् अक्षयां कीर्तिं स्थापयामासुः। उक्तञ्च

"मरिष्यामीति यद्दुःखं प्राणिन उपजायते।
शक्यस्तेनानुमानेन परोऽपि परिरक्षितुम्॥
प्राणा यथात्मनोऽभीष्टाः परेषां प्राणिनान्तथा।
तस्मान्मृत्युभयात्तेऽपि त्रातव्याः प्राणिनः सदा॥

इह जगति परोपकारस्तावत् श्रेष्ठोधर्म्मः कथ्यते महद्भिः। धर्म्मश्च अष्टविधः कथितः। यथा "इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा। अलोभ इति मार्गोऽयं धर्म्मस्याष्टविधः स्मृतः॥" इति धर्म्मोपार्ज्जने अष्टविधः पन्था विद्यते जनानाम्। एतेषु धर्म्ममार्गेषु प्रत्येकमेवार्ज्जयितुं बहवः क्लेशा विद्यन्ते किन्तु एतदतिरिक्तं परोपकाररूपं धर्म्मं उपार्जितुं सुखेनैव समर्थो भवन्ति। अतः सर्व्वदा जनानुपकर्त्तुं यतेत। इज्याध्ययनदानादि तु परत्र सुखाय भवति। परोपकरणन्तु परत्र इहच शर्म्मणि भवति। यथा यो सदा यस्य उपकारं करोति स आजीवनं तस्योपकारकस्य सन्निधौ कृतज्ञतापाशेन बद्धोभवेत्। परत्र च शाश्वतीं पदवीं लब्धुं शक्यति। अतः परोपकाररूपोधर्म्मः परत्र इहच सुखस्य निदानम्।

मांसमूत्रपुरीषास्थिमयात् अतएव असारात् कायात् प्राणविनिमयेनापि आत्यन्तिकसहचरं एकञ्च कल्पान्तस्थायिनं परोपकाररूपं धर्म्मं सदा उपार्ज्जयेत्। दायादैरवण्टनीयं चोरादिभिरनपहरणीयं अमूल्यं प्रलयेऽप्यविनाशिनं एवम्भूतपरोपकारधर्मं सदा कर्त्तुं चेष्टेत। उक्तञ्च महद्भिः।

"दानं वित्तादृतं वाचः कीर्तिधर्म्मौ तथायुषः।
परोपकरणं कायाद् असारात् सारमाहरेत्॥

अथ तस्य फलमाह परोपकारेच्छा येषां चित्ते सदा जागर्त्ति तेषां विपदो नश्यन्ति । पदे पदे सम्पदः स्युः । यथा क्षमया दयया मधुरया वाचा एवञ्च आर्जवेन जगद्वशीक्रियते तथा परोपकारेणापि सर्व्वं विश्वं वशीकर्त्तुं शक्यते मानवैः । उक्तञ्च धर्म्मशास्त्रे—

"परोपकारनिरतो नरो यस्तु प्रजायते ।
स इह श्रियमाप्नोति परत्रापि परं पदम् ॥"

मादृशोऽत्र रचनया सभाग्मनोरञ्जनं विधातुं न शक्तः । अतः दूरादेव विरमामि । उक्तञ्च—

"सज्जना गुणमिच्छन्ति दोषमिच्छन्ति पामराः" ।

बहुनालम् ।

षट्पदी-विवरणम् ।

२ यवर्षस्य १ भखण्डस्य ११४ पृष्ठतोऽनुवृत्तम् ।

समाधानस्य निवेचनानन्तरं संगमनमाविष्करोति, तदिहेत्यादिना—

षट्पदीविवरणम्—तदिह दिव्यधुनीतिपुरस्कृतैः

पदत्रये युंतयैकतमार्य्यया ।
उपादिदर्शयिषत्युपवर्णितम्
सविषयं हि समाधिमतिस्फुटम् ॥ ४३ ॥

इह षट्पदीनिबन्धे, दिव्यधुनीतिपुरस्कृतैः पदत्रयैर्युतया एकतमया आर्य्यया उपवर्णितं निरुक्तरूपम् सविषयं तं समाधिम् अतिस्फुटं यथास्यात्तथा उपदिदर्शयिषतीति योजना । अयमर्थः । दिव्यधुनीमकरन्द इत्यादिसाकूतपदसमन्वयवत्या किलार्य्यया निरुक्तसमाधिरेव विषयविशेषव्यवस्थापनमुखेन प्रतिपिपादयिषितः । एकाग्रतालक्षणसमाधिशून्यस्य परमात्मस्तुतिनमस्कारमात्रेण संसारानर्थप्रहाणप्रयोजनसिद्धौ प्रमाणाभावात्, नवा तथाविधस्य पुरुषस्य तावपि यथावदात्मलाभाय प्रभवतः, पुरुषस्य निरतिशयमहिम्नो भगवतः स्वरूपपरिज्ञानायत्तत्वात्तदीयस्तुतिनमस्कारयोः । प्रत्युत तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय, तरति शोकमात्मवित्, ब्रह्मविद् ब्रह्मैव भवति इत्यादिश्रुत्या शोकहानादिफलस्य ज्ञानैकसाध्यतायाः प्रतिपादनाज्ज्ञानांगसमाधेरपि प्राञ्जस्येन

तत्फलत्वावश्यम्भावात् । स्तुतिप्रथामादेश्चैकतानतोत्कर्षप्रयोजनत्वेऽपि गुणोत्कीर्त्तनोत्कर्षव्यञ्जनादिपर्य्यवसन्नस्य तस्य सगुणब्रह्मविषयतया प्रौत्सर्गिकत्वेन ततो बहिरंगत्वात् प्रकृते विवक्षितफलकामाधिकृतस्याप्रदर्शनाऽसंगतेः । विशदीकरिष्यते चेदं निष्कर्षेणोन्मथनादाविति दिक् ॥ ४३ ॥

स्यादेतत्, स्वभावतः स्वात्मवश्यं हि चित्तमिन्द्रियैरेव बलात्स्वविषयेऽनात्मन्यात्मच्याव्य बहिर्मुखीक्रियमाणं मुच्चावचप्रपंचं गोचरयितुमध्याय कल्पते, तच्चेन्द्रियकर्म्मवृत्त्युपरमेण निगृहीतं स्वविषयच्युतिकारणमनासादयत् न मनागपि तस्य स्वात्मगोचरप्रत्ययजनने कुण्ठीभवितुमर्हतीति व्यर्थमुदितोपरतिनिष्णातस्य समाधिप्रयासानुसरणम् । किं च स्वात्मालम्बनैकप्रवणस्य चित्तस्य स्वालम्बने परोक्षापरोक्षवृत्त्युत्पत्तौ श्रवणादिसहकारिसमवधानाद्विक्षेपरूपान्तरायनिरासाच्च नान्यदपेक्षणीयमस्ति, सति च तस्मिन्व्याधिकसमाधानापेक्षेति समाधिरन्यथासिद्धोऽपवर्गोपायानुपादेय एव । अपि च भावान्तरमभावो हि कयाचित्तु व्यपेक्षया, भावान्तरमभावोऽन्यो न कश्चिदनिरूपणादित्यादि न्यायेनानात्मगतिनिवृत्तेरात्मस्थितिपर्य्यवसितत्वादुपरतिसमाध्योर्न स्वभावविवेकः शक्यः कर्त्तुमित्याशंकां परिहर्त्तुकामः समाधेरुपपत्तिमाह—पूर्वोक्तादिति—अनन्तरपूर्वव्याख्यातादित्यर्थः ।

षट्पदीविवरणम्—पूर्वोक्तान्मौनरूपादुपरतिमिथुनादन्यथासिद्धताऽस्य-

चोत्प्रेक्ष्या तत्र विक्षेपपरिहृतिफलं ह्यत्र शान्तोऽवबोधः ।
भेदे धीतत्स्वरूपादिभिरतिविशदे मा ततोभूदभेदो
योगक्षेमात्मभावादभिलषितफले चैतयोः शान्तशंकः ॥४४॥

मौनरूपात्, ज्ञानकर्मेन्द्रिययोर्विषयोपरमलक्षणात् उपरतिमिथुनात् उपरतिद्वयात् । प्रयुक्तत्वं पंचम्यर्थः । अन्वयश्चास्य अन्यथासिद्धतेत्यनेन । यदन्यथा कार्य्यं सिद्ध्यति तत्त्वम् कार्य्यव्यतिरेक प्रयोजकीभूतेतरव्यतिरेकसहभूतव्यतिरेकप्रतियोगित्वमन्यथासिद्धत्वम् । तत्र चेतर पदार्थस्य स्वरूपसम्बन्धविशेषरूपं प्रयोजकत्वमत्तमम् । एवंच "तेन तस्माद्वाऽन्यथासिद्धमित्युभयत्रैव प्रयुक्तत्वमुक्तदिशा साकांक्षमवसेयम् । अन्यप्रतियोगिकव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगिकार्य्यकालीनत्वम्वाऽन्यथासिद्धिपदार्थः । तादृशसमभिव्याहारस्थले चान्यथासिद्धपदेनव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगिकार्य्यकालीनत्वमात्रमुपस्थाप्यते । तदेकदेशे व्यतिरेके च तृतीयापञ्चम्यन्तार्थं तत्प्रतियोगिकत्वमन्वीयते । यद्वा दर्शितान्यपदार्थगर्भित एव सर्वेषामन्यथासिद्धपदार्थः । तृतीयापञ्चम्यन्तपदसमभिव्याहारे च तृतीया-

पंचमीप्रकृत्यर्थस्यान्यपदार्थेऽभेदान्वयः, विभक्तिश्च तादृशान्वयबोधे शब्दस्याकांक्षासम्पादिकैवेत्यभ्युपगम्यत इत्यन्यदेतत् ।

अस्मिन् निरुक्तस्वरूपे समाधौ, दर्शितोपरतिद्वयप्रयुक्ता अन्यथासिद्धता, नोत्प्रेक्ष्या, उत्प्रेक्षितुमप्यशक्या, तयोरुत्प्रेक्षानर्हत्वमेव समर्थयति हीति यत इत्यर्थः । तत्रेति दर्शितोपरतिद्वय इत्यर्थः । विक्षेपपरिहृतिफलम्· विक्षेपपरिहृतिरेव फलम्· भवतीति शेषः । अत्र· समाधौ· शान्तोऽनुपसर्गो निरुपप्लव इतियावत् । अवबोधः, साक्षात्कारपर्य्यन्तो बोधः, अवमितोऽवधिभूतो वा बोध इति व्युत्पत्तिः । फलमिति वृत्तिस्थमपि तात्पर्य्यवशादनुषज्यते । अयम्भावः । अन्यथासिद्धत्वं हि कार्य्यविशेषरूपावधिनिरूप्यम् न साधारणम् । आकाशादेरपि स्वस्वकार्य्यविशेषं प्रति कारणतायामविवादात् । अन्यथा प्रयोजनानुपगमे तद्विषयप्रमाणप्रवृत्त्यसिद्धौ सत्त्वमेव वस्तुनोऽपह्नूयेत । रूपान्तरेण प्रयोजनसिद्धिसम्भवमादाय प्रमाणप्रवृत्तिसमर्थनेऽप्रयोजकरूपान्तरेणान्यथासिद्धिसम्पादनवत्याशाऽपि काशकुशावलम्बनकल्पाऽवकल्पते । तादृशत्वेनाभिमतरूपान्तरस्यापि प्रयोजनानुपगमेऽपह्नवप्रसंगतादवस्थ्यात्, तत्राप्यन्ततस्ताद्रूप्योपरक्तप्रतीतिव्यवहारसिद्ध्यंगतायावे-षणे तेनापि वस्तुना वस्तुनः सामान्यतोऽन्यथासिद्धेर्दुर्निरूपत्वात् । एवं च विक्षेपपरिहारं प्रति कारणभूतेन दर्शितोपरतिद्वन्द्वेन एव ज्ञानरूपफलनिष्पत्तेरसंभवात्तादृशफलं प्रति समाधेरभ्यासोपजातातिशयवतोऽवश्यापेक्षणीयतया नोपरमणमात्रेणोपेक्षणं शक्योत्प्रेक्षम् । यस्य ह्युत्कर्षनिकर्षाभ्यां यस्य कार्य्यस्योत्कर्षनिकर्षौ प्रामाणिकौ, तत्कार्य्यविशेषे तस्य वस्तुनः कारणत्वं न्यायसिद्धं न जातु प्रतिबन्धनिवृत्तिमात्रेणान्यथयितुमर्हम् । नहि प्रतिबन्धपरिहारे समाने तन्मात्रापेक्षस्य कार्य्यस्योत्कर्षापकर्षौ कथमप्याकस्मिकौ सम्भवेताम् । अवश्यं च साधनप्रवृत्तितत्साद्गुण्यार्थमन्तरायोत्सारणं सामान्यतोऽपेक्षितव्यम्भवति, नैतावता भाविके फले न्यायसिद्धस्य साधनहेतुभावस्य वाङ्मात्रेणान्यथासिद्धत्वेनापह्नवः शक्यः कर्त्तुम् । शाब्दापरोक्षवादे च योगजधर्मस्तदधीना चित्तप्रसादातिशयपर्य्यवसन्ना चित्तस्यैकाग्रता वा यद्यपि नापरोक्षमतिहेतु स्तथापि वक्ष्यमाणश्रवणे तदुपयोगोऽवर्जनीय एवेति सर्वं चतुरस्रम् ।

स्यादेतत्, उपपत्तिप्रकरणे समाधेरन्यथासिद्धत्वेन कारणत्वानुपपत्तिशंकातत्समाधाने नातीव संगते । असंगतोपवर्णनसमर्थनं चोन्मत्तप्रलपितनिबन्धनकल्पनां नातिपतति न चापेक्षितफलांगत्वेनोपक्रान्तस्य समाधेरभिमतसाधनतोपपत्ति-

मन्तरेणोपपत्तिर्नैवुकरा, हेतुत्वविनिर्मुक्तवस्तुस्वरूपमात्रोपपादनस्य साधनचतुष्टयप्रतिपादनप्रतिज्ञयाऽपरिगृहीतत्वेनार्थान्तरत्वात्तदतोऽन्यथासिद्धिशंकाविधूननद्वारेण तदुपपादनमुपपत्तौ नासंगतमिति वाच्यम् । यतो 'यदभिहितनिरुक्तै' रित्यादिनाऽभिहितोपपत्तिलक्षणनिर्वाहायापेक्षितलक्ष्यलक्षणभावव्यवस्थापनरूपकार्य्यविशेषस्यैवावश्यकतया तदुपेक्षणे प्रकृते प्रकरणस्योपपत्तिलक्षणमेव हीयेत । अनपेक्षितस्य च हेतुहेतुमद्भावव्यपाश्रयशंकासमाधानस्यार्थान्तरत्वापादकत्वादागमिककारणत्वावगमे व्यतिरेकांशनिर्णयस्यानुपयोगेन तद्भंगद्वारा कारणताधीविघटनैकफलस्यान्यथासिद्धत्वस्याकिंचित्करत्वाच्चेत्याशयेन भट्टमतोपवर्हेण दर्शितोपरतो समाधिलक्षणातिप्रसंगमाशंक्य परिहर्त्तुमुपक्रमते—भेद इत्यादिना—ततोदर्शितोपरतिद्वयात्, भेदे पार्थक्येऽसंभेदे विवेक इतियावत् । समाधेरित्यादिः । अतिविशदे, स्फुटतरप्रतीतौ, तत्र विवेके गमकमाह—बीजस्वरूपादिभिरिति तृतीयार्थो हेतुत्वं तच्चवैशद्यान्वयि । बीजं प्रयोजनम्, स्वरूपमसाधारणं रूपम् । आदिपदं हेतुप्रमाणसमाख्यादिप्रतिपादनाय । अभेदः संभेदः संकरोऽविवेक इति यावत् । शक्यशंकः माभूत्, नैव भवति । अपेक्षाकारणयोर्भेदनिबन्धनं प्रेक्षावत्प्रवृत्तिद्वैविध्यसंपादकं स्फुटतमभेदकमाह—योगक्षेमात्मभावादिति । एतयोर्निरूपितनिरूप्यमाणयोरुपरतिसमाध्योः अभिलषितफले श्रौतार्थतात्पर्य्यनिर्णयपर्य्यवसन्ने श्रवणे, योगक्षेमात्मभावाच्च योगक्षेमस्वरूपत्वाच्चेति योजना अत्र पूर्वोक्तबीजादिभिःसमुच्चयश्चकारार्थः । एतदुक्तम्भवति काममास्तां समाध्युपरमयोर्भावाभावात्मनोरवस्थाविशेषपर्य्यवसितयोरवस्थावतोऽन्तःकरणादभिन्नयोः परस्परोपश्लेषलक्षणः संकरः, लभतां च सहकारिभावेन समकालसमासादितोपरतिस्वरससमावेशवशेन कदाचिद् भावोऽपि कयाचिदपेक्षयाऽभावसंज्ञाम्, भवतु वाऽन्वयिनि सहसन्निपातिनां धर्माणामन्वयव्यतिरेकरूपः सम्भेद इति वो मतम् । तथापि कार्य्योपाधिविशेषैरापादानिकौ प्रेक्षावत्प्रवृत्तिरुभयत्र भेदेन गृह्यमाणा न निह्नोतुमर्हा, नवा व्यवस्थितविषयतया विकल्पयितुम्, बहुलं सम्वादोपलम्भात्समुच्चयोपलम्भाच्च । नखलु निवातस्थप्रदीपकलिकाया अनिलान्दोलनोपरमोपकृतायाः स्वात्मपर्य्यवसितानिलसंचालनाभावेन सहभूताया अपि प्रभादिकार्य्यविशेषलब्धमर्य्यादाया अपह्नवः संकरो वा सम्भवी, अवर्जनीयसन्निधित्वेन तु क्वचित्कार्य्याणां परस्परं संकरः स्वहेतुप्रयोगिवस्तुन्यपि हेतुत्वमविशिष्टमापादयति यथावर्त्तिविकारकारित्वमुष्णस्पर्शसामान्यकृतं दहनादेः सितभास्वररूपविशेषाश्रितमनुभाव्यते, दग्धीभूतहुताशसंसृष्टायःपिण्डे वा यथैव दग्धृत्वम् । परीक्ष्यमाणं तु

यथाश्रयमेवान्वयव्यतिरेकवशाद्व्यवतिष्ठते । गतिनिवृत्तिरेवस्थितिः, "स्थागतिनिवृत्तौ" इतिस्मरणादिति चेद् विकल्पमात्रमेतत्पुनर्वस्तुवृत्तमवलम्बते । गतिनिवृत्तिमात्रस्य प्रलयसाधारण्येन तस्याः स्थितिव्यभिचारित्वात् । भावमात्रस्य च सत्ताप्यविच्छिन्नत्वात्सत्त्वानुवृत्तये गतिनिवृत्तेरभावरूपाया अपि भावोपलक्षणात्वमात्रांगीकारात् । इत्थं च प्रकृते विक्षेपपरिहारस्य चेतोविनियोगरूपसमाधिप्रतिष्ठातत्फलयो रूपयुक्त्वेऽपि नैतावन्मात्रम् समाधिफले पर्याप्तम् । यावता श्रौतार्थतात्पर्यनिर्णयस्य चित्तवृत्तिविशेषसमुद्भाविताप्रतर्क्यव्यक्तिगोचरस्य साधनप्रवृत्तिप्रतिबन्धकनिवृत्तिभ्यां सम्भवस्तुल्यवदवकल्पेत । अन्यद्धि साधनोपादानेन कृत्यमन्यच्च प्रतिबन्धोत्सारणेनेति लोकेऽपि दवीयानेव तयोर्व्यापारविनियोगः । दुरूहार्थाध्यवसायस्य प्रणिधानसाध्यतायामविप्रतिपत्तेः । अभावविधिवद् भावविधेरप्यन्याक्षेपत्वाद्विनिगमनाविरहेण भावस्योपयोगान्तरेऽवश्यकल्पनीये तत एवासम्भेदस्य दुरपह्नवत्वाच्च । वस्तुतस्तु चित्तस्य सुखप्रकाशात्मकसत्त्वप्रधानतया स्वात्मप्रवणतैकस्वभावस्य बहिरिन्द्रियामार्गितानात्मविषयालोचनाद्युद्बोधितरागादिकषायवशेनैव पारतन्त्र्येण विक्षेपसम्भावनेति तादृशेन्द्रियप्रभवालोचनप्रतिषेधपर्यवसितोपरतेर्दर्शितसमाध्यपेक्षया बहिरंगत्वमावश्यकम् । अन्तरंगबहिरंगयोश्च व्यापारव्यवधानं स्फुटतरमेव । प्रविभिन्नयोश्चव्यापारफलयोः सतोः स्वरूपविवेकोऽपि सूक्ष्मधियां न दुरवेयः प्रसजेत् । किं चाप्यो हि अलब्धाधिगमात्मा योगः अन्यच्चाधिगतसातत्यलक्षणं क्षेमम्, चित्तप्रमादेन प्रकाशस्वभावेनाविदितो विषयः परिहृयते, बहिरिन्द्रियैः पुनरनादिरागादिकषायोद्बोधनद्वारेण बलात्स्वविषयाच्चित्तं प्रच्याव्यते । प्रकृते च चित्तस्य स्वात्मविषयपरिग्रहो योगः । तस्यैव च बहिरिन्द्रियवृत्तिनिरोधेन सातत्यसम्पत्तिः क्षेमत्विति समाध्युपरत्योः प्रक्रान्तयोगक्षेमरूपत्वमविवादम् । एवं च सर्वथा तयोरभेदासम्भवात्समाधिलक्षणं नोपरतावतिव्याप्तमिति दिक् ॥ ४४ ॥

क्रमप्राप्तं समाधानस्य निष्कर्षमाह—

श्रियः पतीति—

षट्पदीविवरणम्—श्रियः पतिपदद्वयीं सरसिजोपमां ह्लादनाद्

अपि त्रिदिवनिम्नगामृतमरन्दसंसेविताम् ।

अबाधितविबोधनप्रमदसौरभामोदिताम्

भजामि मनसाऽनिशं भवभयोत्थखेदच्छिदम् ॥ ४५ ॥

श्रियःपतिपदद्वयीं श्रीमन्नारायणचरणद्वन्द्वम् । सरसिजोपमां सरोजसदृशम्, औत्सर्गिकं साधारणधर्ममाह—ह्लादनादिति मनोहरत्वात् चमत्कारकारि-

त्वादित्यर्थः । अङ्गान्तरात् सुमनोऽन्तराच्च व्यावृत्तं सादृश्यनिबन्धनं समुल्लिखतीति अपीति· त्रिदिवनिम्नगा स्वर्गङ्गा, तस्या अमृतानि जलान्येव मरन्दो मकरन्दः, तेन संसेवितां संप्लुतां संसक्ताम् । एतेन "दिव्यधुनीमकरन्दे" इत्यंशस्यार्थः स्फुटीकृतः । परिमलपरिभोगीत्यादेर्व्याख्यानमादर्शयति । अबाधितेत्यादिना-अबाधितं बाधविरहः, भावे निष्ठाप्रत्ययात् । तथा चाबाधितपदेन त्रिकालाबाध्यत्वरूपं सत्त्वमेव विवक्षितम् । निबोधनं चिद्रूपत्वम् बुध अवबोधन इत्यस्माद्धातोर्ल्युटा निबोधनपदसिद्धेः । आमोदो हर्षः तेनानन्दः संगृहीतः, त एव सौरभाणि, तैरामोदितां वासिताम्, एतेन प्रतिपत्तृचेतोनिर्विशेषसौकर्य्यं स्वारस्यमाविष्कृतम् । मनसा करणेन· भजामि सेवयामि सर्वस्वभावेनावलम्बे इत्यर्थः । सकृत् प्रसक्तिः फलाय नालमित्यतोऽनिशमिति· यावदपरोक्षमित्यर्थः । निष्फले प्रेक्षावत्प्रवृत्त्यनुपपत्तेर्भगवत्पादसरोजानुध्यानस्य फलमाह-भवेत्यादिना, भवत्यस्मादिति भवोऽज्ञानम् । तस्माद्भयमनिष्टाशंसनम् तदुत्पन्नानर्थस्यापरिहार्य्यताज्ञानं वा । तदुत्थोयः खेदः विषादः, तच्छिनत्तीति तामिति योजना । अयमर्थः, श्रेयोऽर्थिनः खलु प्रेक्षावन्तः पुत्रपश्वादिषु सुखसाधनेषु बहुजन्मानुभवपरिपाकोपलब्धदुःखशोकाद्युपप्लवसहस्रोपादानभावेषु समुत्पन्ननिर्वेदा अभ्यर्हिततममपवर्गमेव पुरुषार्थं कामयमानास्तत्साधनतया श्रौतेषु बहुविधेषूपायेषु बद्धस्पृहाः सर्वथा लौकिककार्य्यकारणप्रवणमात्रेणाभिमतसम्पत्तेरैकान्त्यममृशन्तः अरिनिकारेष्विव पुरुषकारप्रकारनिकरकृतोपकारेष्वपरितुष्यन्तः प्रेप्सितसाधनानुष्ठान तत्फलनिष्पत्त्योः प्रायेण परमात्मानुग्रहं समीहन्ते । न्यायविदामपि संवादस्तेषामिममर्थमभिमतमुपोद्बलयति । "ईश्वरः कारणं पुरुषकर्माफल्यदर्शना"दिति गौतमस्मरणात् । ततश्चापेक्षितेशानुकम्पास्तत्प्राप्तिपित्सवः शतमुपायानन्विच्छन्तः क्वचित् चित्तप्रसक्तिमलभमाना विनेयबुद्ध्यनुरोधितदुपचिकीर्षावशोन्मिषितप्रवितताशेषोपासनाप्रभेदेष्वप्येकवाक्येनागमेषु परमात्मोपासनमेव सकलकल्याणहेतुमध्यवस्यन्ति । न चोपासनाऽन्तरेणोपास्ये स्वचित्तार्पणमन्यथासम्भवति । न च चित्तार्पणमैकाग्र्यादन्यत् । न च प्रमातृचित्तसत्त्वसमुद्रेकसमुचितशोभनवस्तुप्रत्यासत्तिमन्तरेण तदेकतानता सुसम्पादनीया । नचोपासनयाऽभिमतसंपत्तौ विप्रतिपत्तिर्युक्ता । योगाचार्य्यैरपि ईश्वरोपासनाया अनन्यसुलभाभीष्टप्रतिपत्तेः "ईश्वरप्रणिधानाद्वा" इत्यनेनाङ्गीकृतत्वात् । "न्यायचर्च्चेयमीशस्य मननव्यपदेशभाक् । उपासनैव क्रियते श्रवणानन्तरागता" इत्यनेन न्यायाचार्य्यैरुपासनाया ज्ञानद्वारा अपवर्गहेतुत्वोपगमाच्च । न केवलं द्वैतवाद एवो-

पासनाऽभ्युपगता, अद्वैतसिद्धान्तेऽपि तदुपगमस्य बहुलमुपलम्भात् । कल्पतरुकृता-
न्तदभ्युपगमस्य तद्वचनव्याख्यानावसरे स्पष्टं प्रदर्शयिष्यमाणत्वात् च । उपासना हि
सा, ययोपासकस्योपास्यप्रत्यासत्तिरुपसम्पाद्यते । युक्तं चैतत्, लोकेऽपि हि सर्वात्मना
शरणीकुर्वतां अवलम्बनीयपुरुषप्रत्यासत्त्यतिशयः सुप्रापो भवति । यद्यप्यद्वैतवादे
नेश्वरस्य वास्तवं रूपमस्तीति नोपासनाऽऽञ्जस्येन घटते, तथापि श्रुतिवशेन साध-
नेषु प्रवर्तमानानां मुमुक्षूणां कृते यावदुपपत्तिर्यथोपदिष्टैरात्मप्रीतिकरै रेव रूपै रारा-
ध्यमानैरपि भगवदुपासनाया अभिप्रेतत्वात् । सगुणोपासनाया इव निर्गुणोपासनाया
अपि सिद्धान्तसिद्धत्वात् । केवलं क्रमसम्पादनीयतालाभार्थं सविशेषावलम्बनमुखे
नेह निर्दिष्टत्वस्योन्मथनावसरे प्रदर्शयिष्यमाणत्वाच्च । नचोपास्योपासकभावपा-
रमार्थिकत्वमुपासनायामुपयुज्यते । तथासति साधनान्तरेष्वप्ययं प्रसङ्गः प्रादुः-
ष्यात् । प्रस्तुतस्तु स्थूलारुन्धतीदर्शनन्यायेनाग्रहवशादन्तरतमवस्तूपदेशस्य श्रुतिषु
स्वरसत उपलम्भात् यथाप्रीति यथाकाममिष्टदैवतमेवैकतानेनोपास्य चित्तप्रसत्ति-
पराकाष्ठाप्राप्तिपरम्परयैवान्तरतमे श्रुतितात्पर्य्यपर्य्यन्तभूते वस्तुन्यपि समाधिन्त-
त्फलं चावसाययितुं शक्नुवीत प्रमातेति साधकानामनुग्राहकतया परमेश्वरस्य
रूपपरिग्रहपरश्रुतिस्मृत्यादीनामाशयः । एवं च सत्त्वप्रकर्षाय पवित्रशोभनतमनि-
खिलाङ्गस्य परिपूर्णचिदानन्दघनस्य श्रीमन्नारायणस्यैकतानेन चित्तसमाधानलक्षण-
मुपासनं तत्प्रसादासादितचित्तप्रसादातिशयद्वारा आरादेव अवयातत्फलसाधन
मिति हृदयम् ॥ ४५ ॥

क्रमप्राप्तं समाधेरुन्मथनमाह ध्येयैकतानत्वमिति, असुन्दरेषु अमनोरमेषु-
ध्येयेषु ध्येयैकतानत्वम् तदेकाग्रत्वम्, दर्शितसमाधिरूपमिति यावत् ।

षट्पदीविवरणम्- ध्येयैकतानत्वमसुन्दरेषु
ध्येयेषु मत्वैव प्रयत्नसाध्यम् ।
सरोरुहारोपमपाकर्षीं
दाचार्य्यवर्य्योऽच्युतपादयुग्मे ॥ ४६ ॥

प्रयत्नसाध्यं कष्टसम्पाद्यम्, मत्वैव अभिप्रेत्य नूनम्, असौ आचार्य्यवर्य्यः
अच्युतपादयुग्मे, श्रीमन्नारायणचरणद्वन्द्वे, सरोरुहारोपम् सरोरुहेण रूपणम्,
वस्तुतः सरोरुहभिन्नयोरुभयोर्भेदनिगीरणपूर्वकतत्तादात्म्यव्यपदेशम्, अकार्षीत् कृत-
वानित्यन्वयः । अत्र च दुःखाद्यनभिमतानिर्वयस्वरूपावधारणफलस्य तत्तद्विषय-
संयमस्य पातञ्जले बहुशः प्रदर्शितत्वाद्दुःसाध्यत्वमुपेत्य प्रयत्नसाध्यत्वमुक्तम् । तथा

च यथा प्राकृतोऽपि सरोजमचिकर्षसमाकृष्टमनास्तच्चारादेव प्रलुभ्यति, तथैव ध्यानमात्र एव भगवत्पादयुगले ध्यायिनां चेतः समाधिमाधातुमलमिति तस्यो-त्सर्गलोलस्यापि स्वरसैकायतासौकर्य्यं सूचनाय पद्मत्वारोपः क्रम इत्यर्थः ॥ ४६ ॥

अथ सरोजत्वारोपे प्रयोजनमुपन्यस्य तत्कारणभावेनाभिमतसाधारणधर्मोणां गङ्गादीनां मरन्दत्वाद्यारोपस्योपयोगमाविष्करोति । समादधानस्येति ।

षट्पदीविवरणम्—समादधानस्य धियो विशुद्धताऽ—

नुबन्धिबुद्धया सुरगङ्गया हि तत् ।

श्रितं त्रुवत्स्य मरन्दरूपया

पवित्रतां प्रौढमतिर्विवक्षति ॥ ४७ ॥

समाधिमभ्यस्यत इत्यर्थः । धियोऽन्तःकरणस्य, विशुद्धता रजस्तमोभ्यामनभिभवः । तस्या अनुबन्धिबुद्धया, तामनुबन्धुं शीलमस्या इत्यनुबन्धिनी या अच्युतपादाब्जद्वयी । तस्या बुद्धिस्तया, तत्सौलभ्यसम्भावनया, तत् पादपद्मयुगलम्, अस्याच्युतपादपद्मयुगमस्य मरन्दरूपया, मरन्देन मकरन्देन रूपं रूपणं यस्याः तया, अध्यस्तमकरन्दाभेदया सुरगङ्गया श्रितं युक्तं संवद्ध मिलितं त्रुवत् निर्दिशत्, प्रौढप्रतिर्विवक्षण आचार्य्यः । पवित्रतां विवक्षतीति योजना । अयम्भावः । त्रिगुणं हि चित्तम् त्रैगुण्यारब्धविषयोपधाने सत्युपधायकसमानजातीयगुणोद्भवानुद्भवानुविधीयमानावनुरूपौ स्वस्य गुणोद्भवानुद्भवावनुभवति, भोक्तुः कर्म्मविशेषवशेन क्वचित्कदाचित्कस्यचिद्गुणस्योद्भवनियमात् । अतएवैकस्मिन्नपि वस्तुनि पुरुषप्रतिनियमेनैकदा प्रीतिपरितापविषादा विशदीभवन्ति । प्रतिक्षणं चान्यथाऽन्यथा परिणममानं दीप इव सितपीताद्यावरणानुबन्धिप्रभाभेदं स्फटिकमणिरिव च जपाद्युपधानभेदनिबन्धनमरुणिमादिकमालम्बनानुरूपप्रसादादिकमादधानं चेतोऽप्यत्वेऽपि नापह्नोतुमर्हम् । यदा च तादृक्पुण्यपम्भारोपनीतं शुभमुपधानमुपलभते ध्यानवृत्तिस्तदाऽवश्यमेवास्या विशुद्धा भवितव्यम् । अतिशयितमहिम्नोः परमात्मपदपङ्कजयोरप्रतिहतानुपमशुद्धिजुषो विश्वपावनसुरापगाम्भः प्रभवयोः समाहितस्य निराबाधममृतुपत्त्वशुद्धिपर्य्यन्तत्वाच्चेतस इति दिक् ॥ ४७ ॥

अथ सत्त्वशुद्धेः स्वतः पुरुषार्थत्वाभावात्पुरुषार्थोपयोगमाविष्कर्तुं तदालम्बनभूतपादपद्मयोः परिमलसद्भावख्यापनव्याजेन प्रदर्शितसच्चिदानन्दपदार्थस्य परिमलत्वारोपबीजमुद्घाटयति—परिमलमुपलभ्येत्यादियुग्मकेन ।

षट्पदीविवरणम्—परिमलमुपलभ्य प्राप्तुकामोऽतिदूरात् ।

कमलमिव मिलिन्दोऽवस्तुमूढाल्पकेभ्यः ॥
मतिरिह विषयेभ्यः सच्चिदानन्दलेशम्
प्रतिपदमवसाय प्राप्नुयाद्वात्मभासम् ॥ ४८ ॥
इति मनसि निधायाकल्पयत्पादपद्मा-
कलितपरिमलश्रीः सच्चिदानन्दमंशम् ।
भवभयजविषादच्छित्त्वमुक्त्वाऽवलम्ब्यो ऽ-
भिलषितफलवत्तामभ्यधित्सत् समाधेः ॥ ४९ ॥

अतिदूरात् परिमलमुपलभ्य समाघ्राय कमलं प्राप्तुकामो मिलिन्द इव, मतिः प्रमातॄणामन्तःकरणम्, अवस्तुमूढाल्पकेभ्यः, अनृतजडपरिमितेभ्यो विषयेभ्यः, प्रतिपदं सच्चिदानन्दलेशं अवसाय गृहीत्वा आत्मभासं परमार्थसन्तं परिपूर्णज्ञानानन्दलक्षणमात्मस्वरूपाकारं प्राप्नुयात् विचारद्वारेणेत्यादिः । इति इत्येवं, मनसि स्वस्येत्यादिः । निधाय कृत्वा पादपद्माकलितपरिमलश्रीः, पदसरोजगतपरिमलश्रिया, सच्चिदानन्दमंशम्, ब्रह्मस्वरूपं अकल्पयत्· व्यपादिशत् आचार्य्य इत्यादिः । अभिलषितं मुमुक्षूणामपेक्षितं यत् फलम् सकारणसंसारानर्थहानलक्षणम् । तद्वत्तान्तदयोगव्यवच्छेदम्, अभ्यधित्सत्, अविवक्षत् । ध्यानवृत्तिर्हि यदा ध्येयस्वरूपमात्रनिर्भासा स्वरूपशून्येव भवति तदा समाधिरुच्यत इत्युक्तम् । समाधेश्च फलं ध्येयेनात्यन्तिकं प्रत्यासत्तिरित्यप्युक्तप्रायम् ।

आत्म-विवेकः ।

नमो दर्शनरूपायाऽदित्याय द्वादशात्मने ।
तमस्तोमविमोकात्मदर्शनैकोपकारिणे ॥ १ ॥
प्रमाणमन्दरोद्भिन्न-प्रमेयाब्धिसमुत्थितः ।
अयमेव महारत्नमात्मोपादीयतां जनाः ! ॥ २ ॥
आत्मनि ज्ञात्वतियन्नाद्देहादिभिदानिवेदने व्ययः ।
नास्तिकधिषणोन्मेषोऽवकाशलेशं न यत्र संधत्ते ॥ ३ ॥
बहुविधकुवितर्कध्वान्तसंघातदुःस्थे
निरुपधिप्रियवस्तुन्यात्तयत्नोऽपि धीमान् ।

विफलति नयलेशः सन्निधिं नाप्नुवान-
स्तदिह विदितशिक्षां वेदये तर्कपद्याम् ॥ ४ ॥
आदौ बृहस्पतिमतं सुगतस्य पश्चात्
शेषे तथार्हतमतं निपुणो निरस्य ।
काणादगौतममतं परिशिष्यमाणां
सर्व्वास्तिकेषु कुतुकात् प्रतिपादयामि ॥ ५ ॥

अथैतद्दुःखभोग्यभोक्तृसंकुले परितः परितापानलदंदह्यमाने संसारकान्तारे, संभ्रम्यमाणान् विश्रान्तिनिकेतनमनुसरतोऽपि यथावदनधिगततत्त्वत्वेन यत्र कुत्र-चिद्विश्रममादधानानपि समासादिततापत्रयतया प्राप्तत्रपोद्वेगविषादानवलोक-यन्तः कारुणिका महर्षयः स्वतोभातसर्व्वार्था लोकानुजिघृक्षयैव सामान्यत आत्मतत्त्वप्रतिपादनपराण्यपि विनेयभेद—भेदाभेदादिविषयभेदरूपनिबन्धभेद-निबन्धनवन्ति दर्शनानि नानाविधान्येव प्रणिन्युः । तेषु खलु दृश्यतेऽनेनेति व्युत्पत्त्या साक्षात्परम्परासाधारणप्रत्यक्षनिमित्तत्वप्रवृत्तिनिमित्तकोऽयं दर्शनशब्दः, चक्षुरादिवत् । स्वात्मनि देहाद्यारोपहेतुसद्भेदाग्रहनिवर्त्तकदेहेन्द्रियादिभेदद-र्शनकारणीभूतधर्मिप्रतियोगिस्वरूपज्ञानसमर्पकतया न्यायादिनिबन्धानां अपि परम्परया दर्शननिमित्तत्वात् । अत्र निमित्तपदं प्रयोजकपरं तेन न प्रकृ-तानव्याप्तिप्रसंगः । अथवा गौतमस्येदं दर्शनं कपिलस्येदं दर्शनं व्यासस्येदं दर्शनं जैमिनेरिदं दर्शनमित्यादितत्तद्दर्शनप्रणेतृमहर्षिगणस्य भिन्नभिन्नानि दर्श-नानि उपादाय प्रवृत्तस्तादृशः शब्द इत्युभयथा अन्वर्थता निर्व्वहत्येव । योगज-दर्शनस्य प्रातिभाख्यस्यालौकिकमानसदर्शनस्य वा महर्षीणामागमसिद्धस्यापलपि-तुमशक्यत्वात् ।

यद्यप्यद्वयात्मकेऽस्मिन् जगति वास्तवभेदाभेदादिविकल्पजालानवका-शात्तदालम्बनानि महर्षीणां दर्शनानि अपरमार्थान्येवेति तद्वशप्रवृत्तस्यास्य दर्शन-शास्त्रस्तोमस्य लोके न समादरः सम्भवी, नथा महर्षीणां अपारमार्थिकानि तादृशदर्शनानि कथंचिदपि सम्भावयितुं शक्यानि । तत्त्वज्ञाननिदाघनिपीतवा-सनारसतया तेषामुर्वरायां चित्तभूमौ विपर्यासांकुरानुदयात् ; तथापि प्रतिपत्तृ-धिषणावशोन्मिषितप्रतिपिपादयिषावतां स्वतोभातसर्व्वार्थानामपि प्रारब्धविपाका-नुरोधाभ्युपेयाऽवश्याऽवस्थितिकवासनालेशप्रसूतस्याहंकारस्य तस्योपदेशान्यथानुप-

पत्तिवलकल्प्यस्यावश्याङ्गीकार्य्यत्वात् । नचैतावता पारमार्थिकदर्शनविरोधः, स्वार्थ-परार्थ-भेदेन भिन्नविषयत्वेनाविरुद्धत्वात् । तेषां स्वतः परमार्थदर्शित्वात् परोपदेशार्थे च विकल्पकल्पनयाबाधितविषयविपर्य्यासलेशवत्त्वादित्यलमतिप्रसङ्गेन ।

तानि च नास्तिकास्तिकभेदेन बहुभेदानि संक्षेपतो द्वादशविधानि प्रथितसमानि । तत्र चास्तिकदर्शनेष्वभ्यर्हिततया प्रस्तूयमानेषु तत्प्रत्यनीकतया नास्तिकदर्शनान्यवश्यप्रत्याख्येयानि इत्यादौ तान्येव प्रक्रमितव्यानि ।

तथाहि सर्व्वे किल प्राणभृतः, सुखं मे स्यात् दुःखं मे माभूदित्यविलक्षणोकाकाराभिनिवेशभाजो याचादिभ्यः प्रसिद्धज्ञाद्यधर्मकेभ्यो विलक्षणतया प्रथितमा अपि अन्ततः स्वात्मपर्यन्तभूमौ चिरमनुदिताध्यवसाया दरीदृश्यन्ते । ते च प्रारब्धवैचित्र्यकृतप्रज्ञावैचित्र्यात् स्थूलतस्त्रिधा विविच्यन्ते । तत्र केचिदनादिवासनावशाद्दुर्वचप्रबलस्वभावा अपि उत्साहमात्रप्रवृत्ताः शिक्षासापेक्षाः, इतरे चावधृतोपदेशास्तर्कागमव्यवहारधारणपटवः, परं पुनरुपदेशाध्वनि स्वाभाविकप्रतिभावशलब्धप्रतिष्ठाः प्रत्युत्पन्नमतय इति । तेष्वाद्याः खलु पशुप्रायेषु आपातदृष्टिमात्रप्रमाणेषु मनुजेषु वारं वारं जनित्वा मृत्वा चातितरां परितप्यमानेषु उपलब्धेषु समुत्पन्ननिर्व्वेदाः, "कोऽहमासं कथमासं, को भवामि, कथं भवामि, को भविष्यामि, कथं भविष्यामी"त्यादित्रैकालिकात्मगोचरप्रतिपित्साभाजो जायन्ते, कदाचित् प्राक्तनपुण्यातिशयवशात् । त एव हीश्वरप्रसादासादितगुरूपदेशाः स्वात्मानं शरीरेन्द्रियमनोभ्यः प्रथमं विवेचयितुमर्हन्ति ।

तत्र तावदतिप्राकृताश्चार्व्वाकाश्च, अहं गौरः, अहं स्थूलोऽहं कृश इत्यादिप्रत्ययव्यवहारयोरविसम्वादबलेन "स वा एष आत्माऽन्नरसमयः" इत्यादिश्रुतिकक्षीकारेण च स्थूलशरीरमेवात्मानमहंकारास्पदमास्थिषत, तदनालोचनमनोहरं । तथाहि नेदं शरीरं स्वभावतश्चेतनं भवितुमर्हति, तथा सति रूपादेरिव चैतन्यस्यापि यावच्छरीरभावित्वप्रसङ्गात् । यत् खलु यस्य स्वाभाविकं, तत्र तत् जहाति, जहाति च चैतन्यं स्यूनमिदं शरीरं प्रमीताविति व्यावर्त्ताविरुद्धोपलब्धेः । न च प्राणसंयोगान्वयव्यतिरेकप्रयुक्तौ शरीरे चैतन्यस्यान्वयव्यतिरेकाविति वाच्यम् । तथापि चैतन्यं शरीरे भवत् प्रत्यवयवं वा भवेत्, यत्र कुत्रचिदवयवे वा भवेत् । आद्ये, मिथोभिन्नानां बहूनां चेतनानां स्वतन्त्रतया कदाचिद्विरुद्धदिक्क्रियत्वे शरीरोन्मथनप्रसंगात् । नचास्ति नियमो, यत्तेषामेकवाक्यतैवौत्सर्गिकीति, अन्यत्र तथाऽदर्शनात् । प्रकृतेऽपि तत्कल्पकाभावात् । ओतनयात्रादिनिर्व्वाहस्यैकचेत-

सङ्कल्पनयाऽप्यन्यथोपपाद्यत्वात् । न द्वितीयः । अचेतयमानेनावयवेन कर्त्तृत्वभोक्तृत्वाद्यनिर्व्वाहे तदारम्भवैयर्थ्यप्रसंगात् । चेतयमानस्याप्यवयवविशेषस्य कदाचिद्विकृतत्वे स्मृत्याद्यनुसन्धानानुपपत्तेश्च । एतेन स्थूलशरीरेऽवयवेषु व्यासज्य वृत्त्यैव चैतन्यमित्यप्यपास्तं । तथा सति यस्य कस्यचिदवयवस्य हानौ चैतन्यवृत्तेरसम्भवात् स्मृत्याद्यभावापत्तितादवस्थ्यात् । वस्तुतः शरीरस्यावयवोपचयापचयादिना प्रतिक्षणं विनाशावश्यंभावात् बाल्यकौमारवार्द्धक्यादिषु च परिमाणभेदेन द्रव्यभेदस्यावश्यकत्वात् परिमाणनाशं प्रति स्वाश्रयद्रव्यनाशस्य कारणत्वात् बाल्याद्यनुभूतस्य स्थविरे स्मरणानुपपत्तेः । न च क्षणिकशरीरे स्मृत्यनुकूलोऽतिशयविशेषः कल्पनीय इति सांप्रतम् । प्रमाणाभावात् जीवनयात्रादिस्थल एव प्रकृतेऽपि स्थिरैकचेतनाभ्युपगमेनैव निर्व्वाहोपपत्तेः । यदपि अनिमित्ततो भावोत्पत्तिः, कण्टकतैक्ष्ण्यादिदर्शनादिति स्वभावादेव तत्तत्कायसन्ताने स्मृत्याद्युत्पादप्रतिनियम इति, तदपि न शोभनम् । दर्शितसूत्रोपदर्शितस्य "अकस्मादेव भवति न किंचिदपेक्ष्य कार्य्य"मित्यस्य तदभ्युपगतपक्षस्य विकल्पासहत्वेनापोह्यत्वात् । तथाहि, अकस्मादेव भवति इत्यत्र किम्शब्दः समस्तेन नञा हेत्वभावे भवनं प्रत्याय्यते । असमस्तेन निषेधार्थकेनाकारेण भवनान्वये हेतोर्भवनाभावः, एकनिषेधस्यापराभ्यनुज्ञाफलकत्वात् पर्य्युदासाश्रयणाद्वा हेतुभिन्नाद् भवनं लभ्यते, हेतुभिन्नं च कार्य्यस्वरूपमलीकं च । तथा च तत्र स्वस्माद्भवनमलीकाद्वा भवनमिति पक्षद्वयं अवगम्यते । अथवा अश्वकर्णादिशब्दवदव्युत्पन्नसमुदायरूपमेतत् स्वभावाद्भवनमित्यभिप्रायकं । तत्र सर्व्वत्र कार्य्योत्पत्तेः कादाचित्कत्वनियमभङ्गप्रसङ्गस्य वज्रलेपत्वात् । तथाहि, हेतुनिषेधे भवनस्यानपेक्षत्वेनाविशेषात् सर्व्वदा भवनप्रसंगात् । भवननिषेधे प्रागिव पश्चादप्यभवनमविशेषात् । उत्पत्तेः पूर्व्वं असतः कार्य्यस्य स्वोत्पत्तावप्रभुत्वेन स्वस्मादिति पक्षानुपपत्तेः । अनुपाख्यस्यस्यालीकस्य कदाचिदप्यसत्त्वात्तत्सापेक्षतायां कार्य्यसातत्यप्रसंगात् । तथा चोक्तमभियुक्तैः—

"हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च । स्वभाववर्णना नैव मवधेर्नियतत्वतः ।" इति यच्चोक्तं कण्टकतैक्ष्ण्यादिदर्शनादिति तदपि, पक्षसमत्वाददेश्यम् । निरवधित्वेऽनियतावधित्वे च कादाचित्कत्वव्याघातात् । अतएवोक्तमाचार्य्यैः । "नह्ययं संसारोऽनेकविधदुःखमयो निरपेक्षो भवितुमर्हति, तदा हि स्यादेव न स्यादेव वा न तु कदाचित् स्यात्" इति । स्यादेतत् नाप्रत्यक्षं प्रमाणमिति अभ्युप-

गच्छतामनुमानमुद्रया कादाचित्कत्वभङ्गो नापादनमर्हति, न खलु प्रयत्नशतेनापि धूमधूमध्वजयोरविनाभावनिश्चयः सम्भवी, न च भूयोदर्शनेन तन्निश्चयः सुकरः, अन्यथा सहचारेऽपि पार्थिवत्वलोहलेख्यत्वयोर्व्यभिचारदर्शनात्। नापि व्यभिचार-ज्ञानविरहसहकृतात् सहचारदर्शनादपि तन्निश्चयः सुसम्पाद इति साम्प्रतम्। योग्योपाधीनां योग्यानुपलब्ध्याऽभावनिश्चयेऽपि अयोग्योपाधिशङ्कया सर्व्वत्र व्यभिचारशङ्कावश्यंभावात्। तथाहि, अविनाभावो नाम, उपाधिद्वयविधुरः सम्बन्धः, स चोपाधिमाशङ्कमानेन दुर्ग्रह एवेति अनुमानकथायै जलाञ्जलिर्वितीर्यते। यत्तु, पर्व्वतादौ धूमादिना वह्न्यादेर्ज्ञानं तत्सम्भावनामात्रात्। सम्भाव-नात्वं पुनः संशयनिष्ठ उत्कटैककोटिकविषयत्वभेद इति। मैवं। 'नानुमानं प्रमाणं' 'नाप्रत्यक्षं प्रमाण'मिति तद्वचनयोरुभयतो व्याहतत्वात्। तथाहि नानुमानं प्रमाणमिति वाक्यमनूद्यते? तत्र किंचित् साधनमुपादीयते वा? नाद्यः स्वार्थासिद्धेः, नह्येकाकिनी प्रतिज्ञा, प्रतिज्ञातमर्थं साधयतीति। तथा सति अति-प्रसंगदोषप्रसंगात्। द्वितीये स्ववचनाभिमतनिरासानुपपत्तिः, उपात्तसाधनस्यैवानुमान-त्वात्। एवं नाप्रत्यक्षं प्रमाणमितिप्रतिज्ञाव्याघातोऽप्यनुसंधेयः। तद्वाक्यस्य प्रामा-ण्याप्रामाण्ययोः स्वार्थव्याघातानतिपातात्। प्रामाण्याभ्युपगमे प्रत्यक्षान्यस्य शब्द-प्रमाणस्य स्वीकारात्। अप्रामाण्ये च क्लृप्तप्रत्यक्षान्यप्रमाणप्रत्याख्यानानुपपत्तेः। यच्चोक्तमुपाधिद्वय विधुरः सम्बन्धोऽविनाभावस्तच्च उपाधिद्वयवैधुर्ये दुरवधारणं योग्यानुपलम्भबलेनायोग्योपाध्यभावनिश्चयासम्भवादित्यनुमाने बाधकाभाव एवेति, तदपि बालबुद्धिव्यामोहनमात्रम्। तथाहि, साध्य व्यापकः सन् साधनाव्यापको धर्म उपाधिरित्युच्यते। तत्र साध्यव्यापकत्वं, साध्यस्य व्यापकः, साध्यं व्यापकं यस्य इत्युभयविधव्युत्पत्त्या साध्यव्याप्यत्वे सति साध्यव्यापकत्वरूपं विवक्षितम्। अतो-जवाकुसुमादिसाधारणोऽयमुपाधिशब्दः। जवाकुसुमस्य हि उप स्वसमीपवर्त्तिनि स्फटिकमणौ स्वधर्ममारुण्यमादधाति समासञ्जयति इत्युपाधिशब्दार्थत्वं, प्रकृते चार्द्रेन्धनादेरपि स्वसमानाधिकरणे स्वावच्छिन्ने वह्न्यादौ स्वधर्मं व्याप्तिं आदधाति समारोपयतीति भवति धूमादौ साध्ये वह्न्यादिहेतावार्द्रेन्धनादिकस्य उपाधिशब्द-वत्त्वमिति। प्रयोजनं चोपाधिपरिज्ञानस्य, यत्तद्व्यभिचारिणः प्रकृतसाधनस्य स्वात्मनि धर्म्मिणि उपाधिव्याप्यसाध्यव्यभिचारानुमानं क्वचिच्चोपाधिरूपव्यापक-निवृत्त्या पक्षे व्याप्यस्य साध्यस्य निवृत्तिपरिच्छेदोऽपि भवति। स चोपाधिः केवलसाध्यव्यापकः पक्षधर्म्मावच्छिन्नसाध्यव्यापकः, साधनावच्छिन्नसाध्यव्यापकः,

उदासीनधर्म्मावच्छिन्नसाध्यव्यापकश्चेति बहुविधोऽपि निश्चितसंदिग्धोभय-
रूपेण स्थूलतो द्विविधो भण्यते। उपाधिनिश्चये व्यभिचारनिश्चयस्येव तत्संशये
व्यभिचारसंशयस्यावश्यकत्वात्। हेतोः किल व्यभिचारितासम्बन्धेन उपाधिमत्त्वं
विवक्षितं, तच्च तेनैव सम्बन्धेन साध्यव्यभिचारस्य व्याप्यमिति तत्संशयस्य
व्याप्यसंशयविधया साध्यव्यभिचारात्मकव्यापकसंशयं प्रति कारणत्वस्य नव्यैरभ्यु-
पगमात्। एतावताऽविनाभावगर्भे तदुभयवैधुर्य्यनिवेशप्रयोजनमावेदितं, निश्चय-
संशययोरुभयत्रैव व्यभिचारज्ञानावश्यम्भावेनाविनाभावस्य दुरवधारणत्वात्।
यद्यप्येवं सर्व्वत्रोपाधिसंदेहाधीनो व्यभिचारसंदेहः सुलभ इति क्वाविनाभावनिश्चय-
सम्भावनेति, तथापि विपक्षबाधकतर्कबलेन व्यभिचारशङ्कामवधूयैवाविनाभाव-
निश्चयणाच्चानुमानकथायां जलाञ्जलिप्रसक्तिः। अथ तर्को नाम व्याप्यारोपाधीनो
व्यापकारोपः, तथाच गौतमीयं सूत्रं—'अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्व-
ज्ञानार्थमूहस्तर्क" इति तत्र कारणोपपत्तितः इत्यनेन व्याप्यस्याहार्य्यारोपादित्यस्य
विवक्षितत्वात्। तथाच व्याप्यव्यापकभावावधारणस्यापि तर्के प्रत्यपेक्षणीयतया-
ऽनवस्थादोषप्रसंग इति चेन्नैवम्। यावदाशङ्कं हि तर्कानुसरणमिष्टमस्माकमेव। यत्र च
व्याघातादेव शङ्का, स्वयमेव नोदेति, नास्ति तत्र तर्कापेक्षेति तत्रैव पर्य्यवसानसौ-
लभ्यादनवस्थाया अभ्युत्थानासम्भवात्। तदुक्तमाचार्य्यवरणैः, "व्याघातावधिरा-
शङ्का तर्कः शङ्कावधिर्मतः" इति। "तदेव ह्याशङ्क्यते, यस्मिन्नाशङ्क्यमाने व्याघातादयो
दोषा नावतरन्तीति" च। को हि नाम सुस्थात्मा धूमार्थं नियमतो वह्निमुपादत्ते,
वह्निर्धूमकारणं नेत्याशङ्कते च, स्वप्रवृत्तेरेव विरोधापत्तेः। तथाच यत्र शङ्कासत्त्वं
तत्र तर्केणैव तां व्युदस्याविनाभावो ग्रहीतुमर्हः, यत्र च स्वत एव शङ्का नास्ति,
तत्र विनाऽपि तर्कं तद्ग्रह इति किमनुपपन्नमविनाभावग्रहस्य। अपिच शङ्कासद्भा-
वमेवानुमानप्रमाणस्याचष्टे नासद्भावं, यतः सन्निकृष्टधूमेऽविनाभावनिश्चयस्यैव
सम्भवेन व्यवहितविप्रकृष्टधूम एव साऽवकाशमासादयेत्। व्यवहितविप्रकृष्टधूमस्य
चेन्द्रियसन्निकर्षविरहेणानवगततया तदवगमस्य केवलमनुमानसापेक्षत्वादि-
तरथा धर्मिग्रहणाभावे शङ्कास्वरूपमेव न प्रसिद्ध्येदिति कथमस्या अनुमानबाध-
कता सम्भव इति। तथाचोक्तं, "शङ्काचेदनुमाऽस्त्येव न चेत् शङ्का ततस्तराम्"
इति अपिचाज्ञसन्दिग्धविपर्य्यस्तपुरुषान् प्रत्येव भवतां प्रतिपादनं प्रयोजनवद्भव-
तीत्यभ्युपेयमन्यथा सिद्धार्थं प्रतिनिष्फलत्वेन प्रवृत्तेरसम्भवात्। ते च परपुरुषगता
अज्ञानसंदेहविपर्य्यासा अवश्यं मुखनेत्रविकारवचनभेदादिलिंगावगम्या एवेत्युरी-

कर्त्तव्यं प्रमाणान्तरासम्भवादिति तदेवानुमानमगत्याभ्युपेयं प्रसज्यत इति सकललोकयात्रामूलमनुमानमुपपत्त्यन्तरं नापह्नोतुमर्हम् । एवं चानुमानसिद्धौ जगतः कादाचित्कत्वात् सकर्तृकत्वेनेश्वरसिद्धिः, जगद्वैचित्र्यान्यथानुपपत्त्या चादृष्टसिद्धिरिति । वस्तुतस्तु देहात्मवादे कृतनाशाकृताभ्यागमप्रसङ्गो दुर्व्वारः, अपूर्व्वदेहाद्यारम्भात् पूर्व्वं चाश्रयाभावादेव कस्यचिन्नियामकस्य कल्पयितुमशक्यतया व्यवस्थाया दुर्व्वचत्वात् । नहि भवति चैत्रस्तदानीं नोत्पन्नस्तदीयदेहेन्द्रियवयोविभवादिकं पुनरन्यदीयेभ्यो वैलक्षण्येनानिमित्तमेव तूत्पन्नमिति । स्वभावव्यवस्थायाश्च एकत्र विरुद्धानन्तस्वभावप्रसङ्गेन तत्रापि पर्य्यनुयोगस्य समानत्वेन चाशङ्कितुमशक्यत्वात् । अन्यथा "क्षणिकाः सर्व्वे एवैते भावा रज्जुभुजंगवत्" इत्याद्यभ्युपगमे मानमेयादिव्यवस्थायाः कार्यकारणव्यवस्थायाश्चासम्भवकवलितत्वप्रसङ्गात् । एतेनेन्द्रियात्मवादमनआत्मवादा अपि प्रतिक्षिप्ताः । तत्तद्विषयस्मृतिहेतुसंस्कारवतस्तत्तदिन्द्रियस्य नाशे तद्विषयस्मृतिविलोपप्रसंगात् । अन्यदृष्टस्यान्येन स्मरणानुपपत्तेः, इतरथाऽतिप्रसंगात् । अणुतरे च मनसि समवेतानां ज्ञानसुखादीनामप्रत्यक्षत्वप्रसंगात् शरीरव्यापिसुखाद्युपलब्ध्यनुपपत्तिप्रसंगाच्चेति दिक् । सौगताः पुनरसदेवेदमग्र आसीदित्यादिश्रुत्या बीजाद्युपमर्द्दं सत्यङ्कुराद्युत्पाददर्शनाद्युपपत्तेश्च शून्यमेव तत्त्वं जगतः, तज्ज्ञानं चापवर्गहेतुरित्याहुः, ते च चतुःप्रस्थानिका बौद्धाः, विनेयबुद्धिभेदश्च प्रस्थानभेदे निदानमित्यावेदितं स्वयमेव बोधितत्त्वनिरूपणे, "देशना लोकनाथानां सत्त्वाशयवशानुगाः भिद्यन्ते बहुधा लोक उपायैर्बहुधा पुनः । गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणा । भिन्नाऽपि देशनाऽभिन्ना शून्यताऽद्वयलक्षणा" इति । तेषु सर्व्वास्तित्ववादः, विज्ञानमात्रास्तित्ववादः, शून्यवादश्चेति मुख्यतस्त्रयो वादाः । आद्योऽपि विज्ञानव्यतिरिक्तबाह्यार्थस्य प्रत्यक्षानुमानाभ्युपगमभेदाद् द्विधा भिद्यते । तत्र प्रत्यक्षबाह्यार्थवादो वैभाषिकस्य, अनुमेयबाह्यार्थवादः सौत्रान्तिकस्य । क्षणिकविज्ञानवादो योगाचारस्य शून्यवादो माध्यमिकस्येति विवेकः । तैश्च प्रत्यक्षमनुमानं चेति प्रमाणद्वयं, उदाहरणोपनयात्मकावयवद्वयवांश्च न्यायः स्वीक्रियते । तत्र वैभाषिकनये, निर्व्विकल्पकज्ञानमेव कल्पनाऽपोढतया स्वलक्षणवस्तुगोचरतया च प्रत्यक्षप्रमाणपदवेदनीयं, तत्पृष्ठभावि सविकल्पकज्ञानं तु कल्पनावसितजात्यादिविषयकं स्वलक्षणवस्तुसंस्पर्शशून्यमित्यप्रमाणं, निश्चयपदवेदनीयम् । परन्तु तद्बलेनैव निर्व्विकल्पकमनुमीयते । सामान्यतो हि बौद्धानां बुद्धोपदिष्टा "सर्व्वं

क्षणिकं क्षणिकं दुःखं दुःखं स्वलक्षणं स्वलक्षणं शून्यं शून्य"मिति भावनाचतुष्टयी। तत्र स्वं लक्षणमसाधारणतया इतरव्यावर्तकं यस्य इति व्युत्पत्त्या स्वतो व्यावृत्तं व्यक्तिमात्रं स्वलक्षणपदार्थः। इन्द्रियाधीनमालोचनाख्यं निर्विकल्पज्ञानमेव तु तद्गोचरतया प्रमाणं भवति वस्तुप्रभवत्वात् तदुक्तं "कल्पनाऽपोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकमिति"। सादृश्यपरिकल्पितं सामान्यं न वस्तुसदस्तीति तद्गोचरं घटादिविशिष्टबुद्ध्यात्मकं सविकल्पकं ज्ञानमप्रमाणं तथा चोक्तं—"न याति न च तत्रासीन्नचोत्पन्नं न चांशभाक्। जहाति पूर्वं नाधारमहो व्यसनसंततिः"रित्यादि। अनुगतप्रत्ययव्यवहारो तु कथंचिदन्यापोहाद्भिना। बाह्यार्थः स्तम्भादिर्नावयवी, किन्तु परिणम्यमानपरमाणुपुञ्ज एव। पुञ्जात् पुञ्जान्तरोत्पत्तेरङ्गीकारात्। यथादर्शनं योग्यतादेः परिणाममहिम्नैवोपगम्यमानत्वाच्च प्रत्यक्षानुपपत्तिगन्धोऽपि। ते च चतुर्विधाः परमाणवः खरस्नेहोष्णेरणस्वभावा भूतभौतिकस्यास्य निखिलबाह्यसंघातस्योपादानानि। तत्र भूतं पृथिव्यादयः, भौतिकं रूपादयश्चक्षुरादयश्च। तथा रूपविज्ञानवेदनासंज्ञासंस्काराः पञ्च स्कन्धाः, तेऽप्यध्यात्मं चित्तचैत्तादिभावेन संहन्यमानाः सर्वव्यवहारास्पदतामापद्यन्ते। तत्र रूप्यन्त इति व्युत्पत्त्या सविषयाणि इन्द्रियाणि रूपस्कन्धः। यद्यपि रूप्यमाणाः पृथिव्यादयो बाह्यास्तथापि कायस्थत्वादिन्द्रियसम्बन्धाच्च भवन्त्याध्यात्मिकाः। विज्ञानस्कन्धोऽहमित्याकारो रूपादिविषय इन्द्रियजन्यो वा दण्डायमानः। या प्रियाप्रियानुभयविषयस्पर्शे सुखदुःखतद्रहितावस्था चित्तस्य जायते सा वेदनास्कन्धः। सविकल्पकप्रत्ययः संज्ञास्कन्धः, संज्ञा संसर्गयोग्यप्रतिभासः, यथा—डित्थः कुण्डली, गौरो ब्राह्मणो गच्छति इत्येवंजातीयकः। संस्कारस्कन्धो, रागादयः क्लेशाः, मदमानेर्ष्यादय उपक्लेशाः, धर्माधर्मौ चेति। तदेतेषां समुदायः पञ्चस्कन्धी। एताभ्यां खलु बाह्याभ्यन्तरसमुदायाभ्यां निखिललोकयात्रानिर्वाहो भवति। विज्ञानं द्विविधमालयविज्ञानं प्रवृत्तिविज्ञानं चेति, "तत्स्यादालयविज्ञानं यद्भवेदहमास्पदम्। तत्स्यात् प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत्" इत्युक्तत्वात्। आलयविज्ञानमात्मस्थानीयं धर्म्मि। प्रवृत्तिविज्ञानं पुनर्नीलादिज्ञानरूपं तस्यैव धर्म इति विवेकः। संवृतिरविद्याऽपरपर्याया संसृतिहेतुः। तया वासनारूपया अविरतविविधविषयगोचरा सोपप्लवा विज्ञानसंततिर्जायते स बन्धः, अभ्यासवैराग्याद्युपायपरिपाकवशात् प्रशान्तनिराकारचित्तसन्ततिरुदीयमानाऽपवर्ग इति हि स्थितिः। तत्र सौत्रान्तिकस्यायमभिसन्धिः। नीलाद्यालम्बनं हि चित्तं स्वस्मिन्नाकारार्पणहेतुविषयसन्निधि-

मद्भवितुमर्हति, असति सन्निधाने हि तदालम्बनत्वे सर्वस्य चित्तस्य सर्वदा सर्वालम्बनत्वापत्त्या सर्वस्य सार्वज्ञ्यप्रसंगात् । तथाच, ये यस्मिन् सत्यपि कादाचित्कास्ते तदतिरिक्तहेत्वपेक्षाः, यथा अविवक्षति अजिगमिषति च मयि वचनगमनप्रतिभासप्रत्ययाः सन्तानान्तरसन्निधानापेक्षाः, तथा विवादाध्यासिताः प्रवृत्तिप्रत्ययाः सत्यपि आलयविज्ञाने कादाचित्का इति तदतिरिक्तबाह्यार्थसिद्धिः । स च बाह्योऽर्थोऽनेन एव स्वभावहेतुनाऽनुमेय इति । अनुमानं च, "कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात् । अविनाभावनियमो दर्शनान्तरदर्शनात्" । इत्यादिप्रकारेण कार्य्यकारणभावतादात्म्यमात्रप्रवृत्तहेतुकव्याप्तिज्ञानरूपं नान्वयव्यतिरेकसिद्धव्याप्तिकं नातो लोकायतमतोक्ताक्षेपावसरः । तादात्म्यतदुत्पत्तिभ्यां किलाविनाभावनिश्चयो भवति, धूमो यदि स्वकारणं वह्निमतिपतेत् स्वात्मानमेव नोपलभेत, तथासति धूमार्थिभिर्नियमेन वह्न्युपादानमनुपपन्नं स्यात् । एवं शिंशपा यदि वृक्षमतिपतेत् स्वात्मानमेवातिपतेत् इति स्वभावस्तादात्म्यं वाऽविनाभावनिश्चायकमिति, तथाच भावहेतुकं पूर्वोक्तमनुमानद्वयं तथाऽनुपलब्धिलिंगकं चाभावहेतुकमेकविधमिति त्रिविधमनुमानमभ्युपगम्यते । तत्र यत् सत् तत् क्षणिकं यथा जलधरः सन्तश्चामी भावा इति सत्त्वेन क्षणिकत्वानुमानं तादात्म्यगृहीतव्याप्तिकम् । तेन सर्वस्य क्षणिकत्वसिद्धिः, सत्त्वं चार्थक्रियाकारित्वं । तच्च क्रमाक्रमाभ्यां व्याप्तं, तौ च क्रमाक्रमौ, स्थिरेभ्यो व्यावृत्तौ तद्व्याप्तमर्थक्रियाकारित्वमपि व्यावर्त्तयतः । तथाहि, भावः क्रमेण तावदर्थक्रियां कर्त्तुमर्हति, तथा सति एकस्याः कार्य्यव्यक्तेर्जननक्षणे कार्य्यान्तरजननसमर्थत्वे भावस्य कार्य्ययौगपद्यप्रसंगात् । समर्थस्य क्षेपायोगात् । असामर्थ्ये च कदाचिदपि तत्कार्य्यजननं न स्यात् । न च कालान्तरे सहकारिसमवधानात्तत् करिष्यतीति वाच्यं सहकारिणामपि अकिंचित् कुर्वतामपेक्षायां बीजाभावात्, अतिप्रसंगापत्तेश्च । नहि मृदं प्रति घटोत्पत्तावकिंचित् कुर्वतां जलसिकतादीनां सहकारित्वे कश्चिदस्ति विशेषः ? किंचित्करत्वे सहकार्य्याधेयबीजादिभावगतातिशयानामुपर्य्युपरिकल्पनावश्यकतायामनवस्थानात् । एवं बीजस्यापि तादृशोपकाराधानेऽतिशयसापेक्षतायां सहकारिणामपि बीजोपकारारम्भे च तदपेक्षायां बहुमुखानवस्थादौःस्थ्यमवसेयम् । ततश्च क्रमकारितापक्षोऽसम्भवपराहतः । नाप्यक्रमेण, सर्वत्र सर्वदा सर्वकार्य्यारम्भप्रसङ्ग इति शिलाभ्योऽप्यङ्कुरजननप्रसक्तौ कृष्याद्युपायानुद्भावनप्रसङ्गात् अन्यथोक्तव्यवस्था

प्रसङ्गाच्चेति दिक् । अत्र वैभाषिकाः परमपरोक्षनीलाद्यवभासिविज्ञानस्याकारभूतस्तावद्बाह्यार्थः परोक्षरूप इत्यत्रानुपपत्तिमुद्भावयन्तः परोक्षाखिलार्थाभ्युपगन्तुः क्वचिदपि व्याप्तिग्रहणासम्भवेनानुमानप्रत्याशाया निरवकाशतेत्याचक्षते इत्येतावानेव विशेषः । योगाचारास्तु विज्ञानमात्रं तत्त्वं बाह्यार्थस्तु तस्यैवाकारविशेषः संवृत्या बहिरिवावभासते, न वस्तुतोऽस्ति । सहोपलम्भनियमेन ज्ञानार्थयोर्भेदाभावसिद्धेः । तदुक्तं, "सहोपलम्भनियमादभेदो नीलतद्धियोः । भेदस्तु भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये" । इति । यच्चोक्तं विज्ञानवैचित्र्यान्यथानुपपत्त्या बाह्यार्थसद्भावसिद्धिरिति, तदपेशलं, विनाऽपि बाह्यार्थं वासनावैचित्र्यादेव स्वप्नादिन्यायेन विज्ञानवैचित्र्यसिद्धेः । को हि स्वप्नजागरयोः प्रत्ययस्य विशेषः ? जाग्रति तावदवगाहमानो बाह्यार्थोऽबाधितो भवति स्वप्ने तु बाधित इति चेत्, नहि स्वप्नोपलब्धस्यार्थस्य स्वप्ने बाधनियमः, तदानीन्तनफलवत् प्रवृत्तिसिद्ध्यन्यथानुपपत्त्याऽनुभवबलेन चाबाधितत्वस्यावश्यकत्वात् अन्यथा जाग्रत्यपि विषयबाधस्य शुक्तिरूप्यादिस्थलेऽप्यविशिष्टत्वात् । किंच स्वप्ने बाह्यार्थाभावादेव वासनावैचित्र्यात् प्रत्ययवैचित्र्यस्यावश्यकत्वसिद्धेः प्रबोधे तद्दृष्टान्तेनैव प्रत्ययत्वादिना तत् सिद्धिरप्रत्यूहैवेति । अन्यथा बाह्यनिमित्तकत्वेऽपि कथं कदाचित् नीलसंवेदनं ? कदाचित् पीतसंवेदनं ? तदानीं नीलस्य सन्निधानादसन्निधानात् पीतस्येति चेत् । अथ नीलसन्निधाने कुतो नीलस्य ज्ञानं न पीतस्येति ? तस्य तत्र सामर्थ्यादसामर्थ्यादितरत्रेति चेत् कुतः पुनरयं सामर्थ्यासामर्थ्यभेदः ? हेतुभेदादितिचेत् एवं तर्हि क्षणानामपि स्वकारणनिबन्धनः शक्तिभेदो भविष्यति, संतानिनो हि क्षणाः कार्य्यभेदहेतवस्ते च प्रतिकार्य्यं भिद्यन्ते च, नहि संतानो नाम कश्चिदस्ति उत्पादकः क्षणानां येन तेन एवामी भिद्येरन् । तस्मात् क्षणभेदस्येव सन्तानभेदस्यापि सामर्थ्यभेदाप्रयोजकतया एकस्मिन्नालयविज्ञानसन्ताने कस्यचिदेव ज्ञानक्षणस्य स तादृशः सामर्थ्यातिशयो वासनापरनामा स्वकारणासादितो यतो नीलाकारं प्रवृत्तिविज्ञानं जायते न पीताकारं, कस्यचित्तु स तादृशो, यतः पीताकारमेव जायते न नीलाकारमिति वासनावैचित्र्यादेव स्वकारणसमासादितज्ञानवैचित्र्योपपत्तेर्न तदतिरिक्तबाह्यार्थसद्भावे किंचनास्ति प्रमाणमिति पश्यामः । आलयविज्ञानसंतानपतितमेवासंविदितं ज्ञानं वासना । तद्वैचित्र्याच्च नीलाद्यनुभववैचित्र्यम् । पूर्वनीलाद्यनुभववैचित्र्याच्च वासनावैचित्र्यमित्यनादिताऽनयोर्विज्ञानवासनयोः । तस्माच्च परस्पराश्रयदोषसम्भवो बीजाङ्कु-

स्यादिति । अन्वयव्यतिरेकाभ्यामपि वासनावैचित्र्यस्य विज्ञानवैचित्र्यप्रयोजकत्वमवगमयतः । तच्चाधस्तात् स्वप्नदृष्टान्तोपादानेन संसूचितम् । एतन्मतेऽपि निरुपप्लवप्रत्ययप्रवाहोदय एव महोदय इति । माध्यमिकाः पुनर्यावत् चित्तसत्त्वं तावद्दुःखसद्भाव इत्यपरितुष्यन्तः सवासनचित्तनाशमेव मोक्षं मन्यमानाः परमार्थतः शून्यमेव मार्गणीयमित्याहुः । तत्सर्वमागमानुमानाभासप्रसूतमिति, नेह सूरिभिः श्रद्धावद्भिर्भावितव्यम् । तथाहि, सौत्रान्तिकवैभाषिकनये, बाह्याभ्यन्तरसंघातद्वयारम्भः, स्थातिरिक्तस्य संहन्तुरभावेऽनुपपन्नः, लोके तथाऽदर्शनात् । अचेतनारम्भमात्रस्य चेतनप्रयत्नपूर्वकतायामव्यभिचारात् । अप्राप्तभोगो हि भोगार्थी भोगसाधने प्रवर्तते इति हि प्रत्यात्मसिद्धं, सेयं प्रवृत्तिः भोगादन्यस्मिन् भोक्तरि भोगसाधनसम्पत्त्यापि नएव कल्प्यते, नास्थिरे; न च भोगादनन्यस्मिन्, नहि भोगो भोगाय घटते, नाप्यन्यो भोगायान्यस्य । एवं मोक्षेऽपि द्रष्टव्यम् । तथाच स्थिरभोक्त्रादिस्वीकारे क्षणिकत्वसिद्धान्तहानिः । अनभ्युपगमे च संघारारम्भानुपपत्तिरित्युभयतः पाशारज्जुः । यश्च तदभ्युपगतः प्रत्ययोपनिबन्धो हेतूपनिबन्धश्च प्रतीत्यसमुत्पादः, स तेषां बुद्धिपरितोषायैव भवेन्नजातु प्रकृतारम्भनिर्वाहाय हेतूपनिबन्धपक्षस्य कथंचित् सम्भवेऽपि प्रत्ययोपनिबन्धपक्षे संघातारम्भासम्भवात् । एकस्य संहन्यमानानामुपयोगादिपरिज्ञान—

श्रीभाष्यम् ।

२ य भागस्य १२१ पृष्ठतोऽनुवृत्तम् ।

भा० । उपासनपर्य्यायत्वाद् भक्तिशब्दस्य, अतएव श्रुतिस्मृतिभिरेवमभिधीयते,—"तमेव विदित्वाऽतिमृत्युमेति" "तमेव विद्वानमृत इह भवति" "नान्यः पन्था विद्यते अयनाय" "नाहं वेदैर्न तपसा न दानेन न चेज्यया । शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥" "भक्त्या त्वनन्यया शक्यो लब्धुमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥" "पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया" इति । एवंरूपाया ध्रुवानुस्मृतेः साधनानि यज्ञादीनि कर्म्माणीति "यज्ञादिश्रुतेरश्ववत्" इत्यभिधास्यते ॥ यद्यपि विविदिषन्तीति यज्ञादयो विविदिषोत्पत्तौ विनियुज्यन्ते, तथापि तस्यैव वेदनस्य ध्यानरूपस्याहरहरनुष्ठीयमानस्याभ्यासाधेयातिशयस्याप्रयाणादनुवर्त्तमानस्य ब्रह्मप्राप्तिसाधनत्वात् तदुत्पत्तये सर्वाश्रमकर्म्माणि यावज्जीवमनुष्ठेयानि । वक्ष्यति च "आप्रयाणात् तत्रापि हि

दृष्टम्" "अग्निहोत्रादि तु तत्कार्य्यायैव तद्दर्शनात्" "सहकारित्वेन चे"त्यादिषु। वाक्यकारश्च ध्रुवानुस्मृतेर्विवेकादिभ्य एव निष्पत्तिमाह,—तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः सम्भवान्निर्वचनाच्चेति। विवेकादीनां स्वरूपं चाह,—

टी० ध्रुवानुस्मृतेर्भक्तिशब्दाभिधेयत्वे हेतुमाह "उपासनापर्य्यायत्वादिति"-उपासनाशब्दस्य भक्तिशब्दस्य च एकार्थवृत्तित्वादित्यर्थः। नचात्र भक्त्युपासनयोः वृक्षतरुशब्दयोरिव एकप्रवृत्तिनिमित्तकत्वरूपपर्य्यायत्वम्। मुक्त्युपायभूतस्य वेदनस्य भक्तिरूपोपासनारूपतामुपपादयति, "अतएवे"ति=मोक्षोपायभूतस्य वेदनस्य भक्तिरूपत्वादित्यर्थः। वेदनस्य भक्तिरूपत्वे प्रमाणं प्रदर्शयितुमाह,—"श्रुतिस्मृतिभिरि"ति। वेदनस्य मोक्षजनकत्वप्रतिपादिकाः श्रुतीरुदाहरति,-"तमेवे"त्यादिः। भक्तेर्मोक्षजनकत्वप्रतिपादिकाः स्मृतीरुदाहरति "नाह"मित्यादिः। एतेनेतदुक्तं भवति,—क्वचिद् वेदनस्य मोक्षजनकत्वं श्रूयते, क्वचिच्च भक्तेस्तद्धेतुत्वं स्मर्य्यते, अतः उभयोरेकवाक्यतया भक्तिवेदनयोरेकार्थत्वमवगम्यते। तस्माद् भक्तेरेव मोक्षसाधनत्वं सिद्धमिति।

पूर्वं ज्ञानस्य कर्म्मापेक्षितत्वमुक्तम्, तत्र प्रकृते वेदनस्य भक्तिरूपोपासनार्थत्वकथनस्य उपयोगं दर्शयितुमाह 'एवमि'ति। "एवं रूपायाः" - अपरोक्षरूपत्वविशिष्टायाः। उपासनात्मकध्रुवानुस्मृतिरूपज्ञानस्य कर्म्मजन्यत्वात्। कर्म्मणां ज्ञाने उपयोगं दर्शयति "साधनानीति" ज्ञानस्य कर्म्मसाध्यत्वे सूत्रकारसम्मतिं दर्शयति "यज्ञादिश्रुतेरश्ववदि"ति। ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इत्यादि श्रुतेः वेदने कर्म्मणामुपयोग इति सूत्रार्थनिष्कर्षः। नच वाच्यं अत्र श्रुतौ प्रत्ययार्थतया इच्छायाः प्राधान्यात् तस्यां यज्ञादीनां करणत्वेनान्वयः नतु वेदने, इच्छायाः प्रधानत्वेऽपि तत्र यज्ञादीनां करणत्वेनान्वये योग्यताविरहाद् धात्वर्थवेदनेनैवान्वयः, यथा अश्वेन जिगमिषतीत्यादौ अश्वस्य गमनेनैव करणत्वेनान्वयः। अपिच एतादृशे प्रवृत्तौ फलभूतवेदने इष्टसाधनताज्ञानस्य कारणत्वेन तत्र इच्छायाः सिद्धत्वेन यज्ञाद्यनुष्ठानस्य वैयर्थ्यापत्तिः इच्छया यज्ञाद्यनुष्ठानं यज्ञाद्यनुष्ठानेन च इच्छा जायते इति इतरेतराश्रयदोषश्च स्यादिति वेदनस्यैव साधनानि यज्ञादीनि कर्म्माणि। तुष्यतु दुर्जनन्यायेन पूर्वोक्तदोषानभ्युपगमेन विविदिषासाधनत्वं यज्ञादीनामङ्गीकृत्य,—कर्म्मणां ज्ञाने अपेक्षां दर्शयति,-"यद्यपी"ति "तथापि"=यज्ञादीनां विविदिषासाधनत्वेऽपि। "तस्यैव" = इच्छाविषयीभूतस्य। "ध्यानरूपस्ये"त्यनेन = शाङ्करमतसिद्धवाक्यार्थज्ञानस्य व्यवच्छेदः। "अहरहरनुष्ठीयमानस्ये"ति विशेषणेन एकदिनाद्यनुष्ठानस्य दिनादिव्यवहितानुष्ठानस्य च व्यावृत्तिः। प्रतिदिनानुष्ठानस्य फलं "अभ्यासाध्योतिशयस्ये"त्यनेन दर्शितम्। "आप्रयाणाद्" = मरणं यावद् अनेन मासवत्सराद्यवधेः व्यवच्छेदः। अत्र स्मृतिविच्छेदव्युदासार्थं "ध्यानरूपस्ये"त्युक्तम्। "तदुत्पत्तये" = विविदि-

चेत्यतआह । आप्रयाणादहरहरुपासनानुवृत्तौ यावज्जीवं कर्म्मणोऽपेक्षितत्वे सूत्रकृत्सम्मतिं दर्शयितुमाह "वक्ष्यति चे"ति । सूत्रप्रदर्शनेन तद्विषयभूतश्रुतिवाक्यान्यपि स्मारयति "आप्रयाणाद्" इति । क्रमेण सूत्राणां तत्सूचितश्रुतीनां चार्थः,—"आप्रयाणादि"ति = आप्रयाणात् मरणं यावद् अहरहरुपासनं कार्य्यं "स खल्वेवं वर्त्तयन् यावदायुषमि"ति दर्शनात् । एतत्-सूत्र-सूचितायां "स खल्वेवमिति श्रुतौ यावच्छब्दस्य साकल्यार्थत्वाद् अहरहरनुष्ठानसिद्धिः । तावत्कर्म्मापेक्षाप्रदर्शनाय अपरं सूत्रम्,—"अग्निहोत्रादि तु तत्कार्य्यायैव तद्दर्शनात्" = अग्निहोत्राद्याश्रमकर्म्म, विद्योत्पत्त्याख्यकार्य्यायैव आप्रयाणात् तदनुष्ठेयं "तमेतं वेदानुवचनेन" इत्यादिना विद्योत्पत्तिकार्य्यत्वं ह्याश्रमधर्म्मस्य दृष्टम् । आश्रमधर्म्माणां विद्याङ्गत्वमप्यस्तीति दर्शयितुमन्यत् सूत्रमुदाहरति "सहकारित्वेन चे"ति = तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन चे"ति श्रुतेर्विद्याङ्गतया विधेर्विद्यासहकारित्वेन विदुषा चानुष्ठेयम् । उक्तार्थं सूत्राभिप्रायविदः वाक्यकारस्य वचनरूपप्रमाणं प्रदर्शयितुमाह,-"वाक्यकारश्चे"ति। तद्वाक्यसारं संगृह्णाति 'ध्रुवानुस्मृतेरि'"ति । अनेन वक्ष्यमाणवाक्यकारोक्तलब्धिरिति वाक्यस्थस्य तच्छब्दस्यार्थः उक्तः । "विवेकादिभ्य एव" = नतु केवलकर्म्मणा केवलशमादिना चेत्यर्थः । वाक्यकारवाक्यं स्वरूपत उपादीयते—"तल्लब्धि"रिति । "तल्लब्धिः" = ध्रुवानुस्मृतेर्लाभ इत्यर्थः । उपासनं स्यात् ध्रुवानुस्मृतिरिति प्रकृतत्वात् । विवेकविमोकादीनाम् इतरेतरयोगार्थं द्वन्द्वसमासात् ध्रुवानुस्मृतिरूपकार्य्ये एषामन्योन्यं सापेक्षाणाम् साधनानां समुच्चय एव नतु विकल्पः तस्यादृष्टदोषदुष्टत्वात् । निवृत्तिरूपशमादेः प्रवृत्तिरूपयज्ञादेश्च विरोधाच समुच्चय इति चेत् भिन्नविषयत्वेन विरोधाभावात्, अविहितावर्त्तिविहितकार्य्यविषया हि शमादयः । "सम्भवाद्" = उपपन्नत्वात् । "निर्वचनात्" = श्रुतिवचनात् । प्रमाणोपपत्तिभ्यामित्यर्थः । विवेकादयः किंरूपाः ? कथं वा शमादेः कर्म्मणश्चाविरोधः इत्यत्राह "विवेकादीनां स्वरूपं चाहे"ति = न केवलं परिगणनमात्रं तत्स्वरूपं च वाक्यकार एवाहेत्यर्थः ।

विभीषणस्य चरितम् ।

१म वर्षस्य १म खण्डस्य ८५ पृष्ठतोऽनुवृत्तम् ।

तृतीयोऽध्यायः ।

वत्स ! परमभक्तियुत ! धर्म्ममते ! परोपकारव्रतोत्सृष्टजीवन ! त्रिभुवनजनानन्दन ! प्रीतोऽस्मि ते मन्मनोऽनुरञ्जनविधायिना भक्तिप्रकाशकेन प्रीतिप्रदायकेन स्तवेन तपसा च, इदानीं ते यथाभिलषितं वरं वृणुष्व । ततः शीतोष्णादिद्वन्द्वसहिष्णुः सुखदुःखसमज्ञानः भक्तिपरायणोऽसौ विभीषणः सकलाभीष्टसम्पूरणार्थं समागतं चतुराननमुवाच । भगवन् ! जगज्जनैकपालक ! सेवमानानां भक्तानां सर्व्वार्थसाधक ! निखिलशुभकर नियमसंस्थापक ! प्रभो ! नास्ति मे यत्त-

जननिकरैः प्रार्थनीयया मनोरमत्वेन प्रतीयमानया वराबाप्त्या प्रयोजनम्। भक्तजन-सविधावागमनं मे जातु कथमपि निष्फलं न भवति, अतएवाहं वरं त्वया सर्व्वथा याचितव्यः, इत्थं प्रजापतिपयोदितेन विभीषणेनोक्तं, यदि त्वयावश्यमेव वरो दातव्यस्तर्हि अशिक्षिता मयि श्रेयस्करी धनुर्विद्या क्लेशकरेणाध्ययनेन विना केवलं सर्व्वलोकप्रभोः स्वयम्भुवस्तवैव भक्तजनमङ्गलप्रदायिना प्रसादेन प्रति-भातु। लोकमङ्गलार्थे त्वया विहितेषु येषु येषु आश्रमेषु मन्दमतेर्मम या या बुद्धि-र्जायते, सा सा यथा धर्म्मनिष्ठा जगद्धितकारिणी च भवेत्, तथा विधीयताम्। सततं पापकार्य्ये प्रवृत्तचित्ताय कल्याणोदर्कसर्व्वविधसत्कर्म्माक्षमाय मे पारलौ-किककल्याणनिदानभूते आश्रमधर्म्मप्रतिपालने सविशेषसामर्थ्यम् अनुक्रोशपुरःसरं मदीयानां ज्ञानतोऽज्ञानतो वा सम्पादितेन मत्कृतकर्म्मजातेन समयजगतां जनाः यथा उपकृताः सुखिताश्च भवन्ति तथा क्रियतां। इत्येवं याचितोऽसौ विरिञ्चिः, वत्स! मतिस्ते धर्म्ममार्गानुसारिणी लोककल्याणकारिणी च, अतस्ते सर्व्वथा प्रीतोऽस्मि। त्वं हि निरन्तरक्लेशजनकस्य संसारस्यास्य असारताभिज्ञः परमतत्त्वज्ञः कामिनीकाञ्चनादिभोग्यवस्तुषु समुपजातवैराग्यः निःस्पृहश्चासि। अतस्त्वं निखिलभुवननिवासिभिः सकलप्राणिभिः प्रार्थ्यमानाम् अमरतामासाद्य परोपकारे-धर्म्मे सर्व्वस्मिन् कर्म्मणि निरतः सुखेन कालं गमय। त्वया प्रार्थनीयं समयविषयं मत्तो लभस्व, इत्युक्त्वा शून्यमार्गेणान्तर्दधे॥ इति श्रीयामिनीरञ्जन देवशर्म्मकृते श्रीविभीषणचरिते श्रीविभीषणवरावाप्तिर्नाम तृतीयोऽध्यायः।

चतुर्थोऽध्यायः।

एवं ब्रह्मवरलाभाद्दीप्ततेजाः प्रवचमहौजाः असौ विभीषणः नानाविध-सुगन्धि-प्रसून-फलसमन्विताभिः महातरुराजिभिराकीर्णे निर्म्मलजलविलसितप्रस्र-वणसम्पन्ने पतत्त्रिचरादिकृताश्रमे परमरमणीये त्रिदिवैकदेशसमाने श्लेष्मातक-वने कियत्कालं तपयामास। ततः पापीयसा वनचरेण रावणेन विताडित-वैश्रवणायां महोदधिपरिवेष्टितायां सकलसाम्राज्यशिरोमणिभूतायां काञ्चनमय-लङ्कायाम् आगत्यासौ धर्म्मात्मा विभीषणः भुवनत्रितयपीडकस्य परलोकहितसा-धिकया सुमत्या विरहितस्य परमदुर्म्मतेर्लङ्काधिपतेः सत्पथसञ्चरणप्रवृत्तिजननाय सचिवतां कुर्व्वाणः सर्व्वदा लोकहितकारकं यशोवर्द्धकं अन्विजनोचितसत्परामर्शं प्रयच्छन् लब्धावसरे परमे ब्रह्मणि निहितान्तःकरणः न्यवसत्। अथैकदा मह-र्द्धिसमृद्धायां सर्व्वजनप्रसिद्धायां निजसुषमानिर्धूतमहेन्द्रलोकायां सर्व्वर्तुसुखदायाम्

अयोध्यायां निःशेषराजगुणोपेतस्य प्रभूतयदनुष्ठानलब्धयशसः अशेषपुण्यशालिनः सकलराजकुलललामभूतस्य नृपतेर्दशरथस्य लोकत्रयहितार्थिनि महैश्वर्य्यसङ्घातशालिनि युगधर्म्मसंरक्षणाय दुष्टान् निगृह्य शिष्टान् पालयितुकामे पुरुषोत्तमे गोलोकपतौ नारायणे पुत्ररूपेणावतीर्णे सति निरन्तरश्रेयोविधायिनी अचलापि लङ्कावसुन्धरा दुरात्मनो दशाननस्य भाविमहाविपज्जालसंसूचनार्थं मुहुर्मुहुः प्रकम्पिता सती अनर्घरत्नराजिखचितं निर्म्मलकाञ्चननिर्म्मितं परमसुषमावधीरितशक्रसिंहासनं रावणसिंहासनमकम्पयत् । ततो भूपतितमणिमयशिरोभूषणेन सञ्जातकोपेन गर्व्वविनाशितदिग्गजेन दशाननेनोक्तम्—रे रे पापीयसि अनात्मज्ञे वसुमति ! ईदृशी ते गर्व्वपरम्परा ? इयती ते असदृशव्यवहृतिः ? अधुनैव समुचितशास्तिप्रदानपूर्व्वकं त्वां गतासुं विदधामीत्युक्त्वा गृहीतशरासनं महता भयेन वेपमानां वसुन्धरां जिघांसुं कोपात् कृतदशननिनादं रावणं प्रति दीर्घासु बाहुराजिषु धृत्वा विदितवृत्ताक्तजातः निरपराधां पृथिवीं रक्षितुकामः विभीषणः सविनयमुवाच । भो भोः निर्निमित्तकृतकोप ! सर्व्वलोकशासनक्षम ! लङ्काधिप ! कोपं संहर संहर, नायमस्याः दोषः, नह्येतत्कृतोऽयमानो वा, सर्व्वथा निर्द्दोषेयम् । तर्हि केनोत्पादितोऽयमनर्थः, इत्थं रावणपृष्टेन विभीषणेनोक्तं भुवनत्रितयक्लेशजनकस्य अजस्रं पापपथपर्य्यटकस्य ते संजिहीर्षया सर्व्वभूतक्लेशव्यथितहृदयस्य धर्म्मग्लानिनाशाय लब्धाविर्भावस्य स्वजनेनालङ्कृतदशरथभवनस्य अनादिनिधनस्य भगवतो नारायणस्य उत्पत्तिप्रभव एष भवद्भाविलव्याभव्यसूचकः अनर्थपातः, भवच्चेतनासम्पादकं वा ईदृक्त्वे मानखण्डनम् । एवं निर्द्दोषां वसुमतीं प्रति शान्तकोपेन स्वानुजविभीषणाल्लब्धसान्त्वनेन स्वां प्रकृतिमापन्नेन लङ्कापतिना मानसशान्तिहरस्यास्य वृत्तान्तस्य याथार्थ्यनिर्णयाय विश्वासभाजनं परमप्रभुभक्तः प्रणिधिरयोध्यायां प्रेषितः । इति श्रीयामिनीरञ्जनदेवशर्म्मकृते श्रीविभीषणचरिते धरारक्षणं नाम चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

अथ कालेषु गच्छत्सु लब्धयौवन उभयलोकशुभसाधकं प्रचुरप्रमोदजनकं श्रेयस्करधर्म्महेतुभूतम् आश्रमप्रधानं गृहस्थाख्यं प्रविविक्षुः शोणितादिजन्यां शरीराशुद्धिं शोधितुकामः विभीषणः, परहितव्रतपरायणस्य प्रजारञ्जनतत्परस्य शौर्य्यादिगुणालङ्कृतस्य शङ्खेन्दूज्ज्वलकीर्त्तेर्गन्धर्व्वभूपतेः शैलूषस्य नारीजनोचितगुणराजिमण्डितां विविधविद्याविभूषितां रूपलावण्यप्रसिद्धललनाकुलललामभूतां

पतिव्रताधर्म्मैकधनां यौवनसन्धौ वर्त्तमानां सुविमलसौन्दर्य्यनिर्ज्जितसुन्दरीजनां पतिमनोवृत्त्यनुसरणक्षमां सरमां मौहूर्त्तिकावेदितसमये धर्म्मशास्त्रोक्ते विवाहोपयुक्ततिथ्यादौ यथाविधि परिणिनाय । अथ परिणयसंस्कारसंस्कृतो विभीषणः यथाधर्म्ममनुष्ठिते गार्हस्थ्यधर्म्मे गच्छता कालेन धर्म्मकार्य्यानुष्ठानानुकूल्य सम्पादिकायाः पतिशुश्रूषमाणायाः स्वभार्य्यायाः सरमाया गर्भजातं रूपेण गुणेन च पितरमनुकुर्व्वन्तं पुत्रामनिरयतारकं पित्रोस्तपसः फलस्वरूपं जननीजनकप्रार्थनीयं पुत्रानुरूपं विश्वजनीनधर्म्मकार्य्यमानसं द्वितीयमात्मानं पितृभक्तप्रधानं तरणीसेननामकं तनयमाससाद । क्रमशः

संक्षिप्तं कुन्तीचरितम् ।

यदुवंशीयशूरसेनस्य दुहिता वसुदेवस्य स्वसा नाम्ना पृथा पश्चात् कुन्ती इत्याख्यां प्राप । शूरसेनः यथाङ्गीकारं स्वस्य प्रथमां कन्यां पितृस्वसृपुत्राय अनपत्याय कुन्तिभोजराजाय प्रददौ । तेन कुन्तिभोजेन प्रतिपालिता पृथा कुन्तीति अभिहिता । अथ कदाचित् उग्रतपा महर्षिर्दुर्व्वासास्तस्य राज्ञः सदनमेत्य आतिथ्यं लेभे । वर्षमेकं तत्र स्थित्वा कुन्त्याशुश्रूषया अतीव परितुष्टः स मुनिस्ताम् एकं महामन्त्रं शिक्षितवान् तन्मन्त्रमुच्चार्य्य सा यमेव देवं स्मरिष्यति स्मृतमात्रः स तां निकषा सशरीरः आगमिष्यति । बालस्वभावसुलभचपलतया सा मन्त्रपरीक्षणार्थं सूर्य्यदेवं सस्मार । तदैव स तत्रोपतस्थे तस्यागमनं तु विफलं नासीत् । कुन्त्यां कौमार्य्ये तस्मात् जातः कर्णः लोकलज्जाभयात् पेटिकायां संस्थापितः धात्रीसाहाय्येन नद्यां परित्यक्तश्च । अथ लोकमुखात् तया आकर्णितं स्वपुत्रः कर्णः अङ्गेषु सूतेनाधिरथेन तत्पत्न्या राधया च प्रतिपाल्यत इति ।

गच्छति कियति काले कुन्तिभोजराजेन कन्यास्वयम्वरः घोषितः । कुन्ती तत्सभामागत्य पाण्डुराजाय वरमाल्यमर्पयित्वा तं पतिं वव्रे । स च राजा माद्रीनाम्नीमपरामेकां स्त्रियं पत्नीत्वेनागृह्णात् ।

द्वे स्त्रियौ पाण्डुना सह वनम् अभ्रमताम् । ततो मृगव्यवायनिधनात् कृच्छ्राम् आपदं प्राप्य ब्राह्मणस्य शापभयेन स्त्री-सहवासवञ्चिते पाण्डौ, पुत्रोत्पादनमवश्यकर्त्तव्यमिति विमृश्य केनापि पुत्रमुत्पादयितुं तेन अनुज्ञाता सा कुन्ती मुनिदत्तमन्त्रबलेन यथाक्रमं धर्म्मराजं, पवनदेवं देवराजं च स्मृत्वा युधिष्ठि-

रभीमार्ज्जुनान् त्रीन् पुत्रान् लेभे। माद्री अपि तन्मन्त्रं कुन्तीसकाशादधिगम्य स्वर्व्वैद्यौ अश्विनौ सस्मार। अथ तयोः समागमेन यमकौ नकुलसहदेवौ सञ्जातौ।

कालनियोगात् पाण्डौ मृते, माद्री स्वामिनश्चितामारुह्य प्राणान् जहौ। ततः पाण्डवानां रक्षणं पोषणञ्च कुन्त्यां न्यस्तमभवत्। तदा कुन्ती तान् पुत्रान् गृहीत्वा हस्तिनापुरं जगाम। विद्याशिक्षायां समाप्तायां ते यशस्विनः सञ्जाताः। तद्बलौश्चर्य्येर्ष्यान्वितो धृतराष्ट्रपुत्रो दुर्य्योधनस्तेषां व्यापादनाय सपुत्रां कुन्तीं वारणावतं जतुनिर्म्मितगृहे अवस्थानाय प्रेरयामास।

धर्म्मरतस्य महाप्राज्ञस्य देवरस्य विदुरस्य मन्त्रणाकौशलेन सा पुत्रैः सह निर्व्विघ्नमरण्यं प्रतस्थे। ततस्ते एकचक्रायां नगर्य्यां कस्यचित् विप्रस्य सदनमभूयुः। तत्र बकराक्षसेनोपद्रुतस्य शरण्यस्य गृहस्वामिनो दुःखेन व्यथिता सा तनयेन बलवता भीमसेनेन निशाचरोऽसौ यमसदनं प्रापितः। ततस्ते सुताः प्रच्छन्नविप्रवेशाः पाञ्चालराजदुहितुः द्रौपद्याः स्वयम्बरसभां गताः। असमर्थेषु सर्व्वेषु तत्र समेतेषु नृपेषु लक्ष्यभेदे तृतीयपाण्डवेनार्ज्जुनेन तल्लक्ष्यमतिशयितेन शरप्रयोगकौशलेन विद्धं शून्यात् क्षितौ पातितञ्च।

अथ लब्धकन्यया सह गृहमुपस्थितास्ते पाण्डवाः द्वारात् मातरमूचुः, मातः पश्य किमानीतं द्रव्यमस्माभिरद्य, माता अदृष्ट्वैव तत् प्रत्युवाच वण्ठनं कृत्वा गृह्णीत। अतो मातुरादेशात् ते पञ्चभ्रातरो मिलित्वा द्रौपदीं परिणिन्युः। ततः युधिष्ठिरेण इन्द्रप्रस्थे राज्ये स्थापिते कुन्ती तत्र सुखसुखेन तस्थौ। गच्छति कियति काले अक्षक्रीडया हृतराज्ये युधिष्ठिरे पत्न्या भ्रातृभिश्च वनं गते कुन्ती धार्म्मिकं विदुरं निकषा तिष्ठत्। त्रयोदशवर्षेषु गतेषु अनिवार्य्ये कुरुपाण्डवयुद्धे रहसि कुन्ती कर्णसमीपं गत्वा तस्य जन्मवृत्तान्तं विवृतवती तम् पाण्डवपक्षेयुद्धार्थमनुरुरुधे च। कर्णस्तु सत्यपरायणः तस्मिन्नसम्मतो भूत्वा प्रतिज्ञामिमां चकार सः अर्ज्जुनादन्यं कमप्यपरं न हनिष्यतीति। कुन्ती अनन्योपाया तेनैव सन्तुष्टा स्वभवनं प्रत्यागता। अथ घोरसमरावसाने कुन्ती कर्णस्य जन्मवृत्तान्तं युधिष्ठिरं कथयित्वा तं स्वभ्रातुस्तर्पणं कर्त्तुमादिशत्। भ्रातृशोकेन मुह्यमानो युधिष्ठिरो मातरं स्वल्पं निनिन्द।

अथ कुन्ती सपुत्रा पञ्चदशवर्षाणि परमसुखेन उषित्वा धृतराष्ट्रेण सह वनं गत्वा अनन्यमनास्तपश्चरणे प्रवृत्ता। त्रीणि वर्षाणि तपश्चरित्वा सा धृतराष्ट्रगान्धारीभ्यां सह दावानलेन भस्मीभूताऽभवत्।

आलङ्कारिकः

साहित्यदर्पणकारो

विश्वनाथः ।

आसीत् किल लवणोदधिवेलावनालिपरिगतपुरुषोत्तमक्षेत्रस्य अनतिदूरस्थान-वास्तव्यस्य कौशिकवंशस्यावतंसो नारायणदासस्य पौत्रः कविचन्द्रोपाधिकस्य पुष्पमाला-भाषार्णवयोर्विरचयितुश्चन्द्रशेखरस्य सूनुः स्मार्त्तब्राह्मणो विश्वनाथ-नामा । यः पितामहस्यानुजात् काव्यप्रकाशटीकाकर्त्तुश्चण्डिदासादभ्येष्ठ इव मानवानां मनःसु प्रतिभातः ।

सुविदितदासवंशोद्भवत्वात् कौशिकगोत्रं, स्वस्य कवित्वात् कविराजोपाधिं, सन्धिविग्रहकर्म्मणि नियुक्तत्वात् सान्धिविग्रहिकपदवीं, यागादिना तन्त्रेण च प्रीतान्नृपतेर्महापात्रोपाधिञ्च लेभे । तेनामुं सर्व्वे कविराज-विश्वनाथ-सान्धिविग्र-हिक-महापात्र इत्याऽहुः ।

इतरे सुकुमारमतयः साहित्यदर्पणादिग्रन्थकर्त्तुः कविकुलचूडामणेरस्य वैद्यविद्यालब्धकविराजोपाधिरिति कीर्त्तयन्ति । उपाधिरसावपि वैद्यानां द्विश-तवर्षतः प्राग् नासीत् कस्यचित् कर्णपथमारूढः । अपरे च किन्तु द्विजोऽयं सन्धि-विग्रहकर्म्मणि नियोजित इति जल्पन्ति । अपितु वीरपुरे कृष्णपुरवास्तव्या महा-पात्रोपाधिधारिणोऽस्य वंशधराः कीदृशीं रणकीर्त्तिं लेभिरे तामिह प्रकटयितुं न शक्नुमः । तां तत्रत्याः सहृदया विदन्ति ।

केऽपि "महापात्रपदालङ्कृतो विश्वनाथोऽन्यदेशीयो भवति, किमियं मनीषा उत्कलीयस्य सम्भाव्यते" इति निगदन्ति । अमभिगढ़िताम् तान् ब्रवीमि, तेषु कतम उत्कलदेशं परित्यज्य अन्येषु जनपदेषु महापात्रपदं शृणोति? यद्यप्यनुच्चश्रेणीयब्राह्मणानां देशान्तरे सा पदवी श्रूयते तथापि तैः स्वयं न प्रख्यायते सा, निकृष्टोपाधिप्रख्यापनस्य लज्जाकरत्वात् । उत्कले तु महापात्रपदवी-भूषिताः सन्ति कियन्तो द्विजाः कुलीना राजपूजिताश्च । अपिच विश्वनाथः स्वग्रन्थेऽश्लीलताया उदाहरणे—

"पद्मं कोकनदेऽद्भामि पाणिः पल्लवपेशलः,
वदनं सौरभोद्गारि सुभगायाः स्वभावतः ।"

श्लोकमिमं प्राह । उत्कलभाषायां हि पेलवशब्दस्य आद्याक्षरे अश्लीले । तदक्षरद्वयं सपदि अवद्याङ्गमवगमय्य श्रोतृपक्षं दूषयति । अन्यच्च उत्कले

रीतिरियं शासनवासिनो ब्राह्मणा एव राजाधिराजमुत्कले गजपतिं प्रति आशिषमाचरन्ति । तानेव तु प्रणमन्ति ते चोद्गभूपाः । विश्वनाथस्य स्वग्रन्थे श्रीनरसिंहदेवं प्रति—

" आहवे जगदुद्दण्डराजमण्डलराहवे,
श्रीनृसिंह महीपाल ! स्वस्त्यस्तु तव बाहवे ।"

एतदात्मकाशीर्व्वाददर्शनात् उत्कलान्तःपातिशासनीयब्राह्मणत्वं सुगमम् ।

तत्कृतस्य स्वेनैव काव्यप्रकाशदर्पणीयरसप्रकरणे "यदाहुः श्रीकलिङ्ग * भूमण्डलाखण्डलमहाराजाधिराजश्रीनरसिंहदेवसभायां धर्म्मदत्तं स्थगयन्तः सकलसहृदय गोष्ठी-गरिष्ठ-कवि-पण्डितास्मत्-पितामह-श्रीनारायणदासपादाः" इति । तत्रैव च " इहास्मत्पितामहानुज-कविपण्डित-मुख्य-श्रीचण्डिदासपादैरुक्तम् इति ।

दर्पणेऽपि—

श्रीचन्द्रशेखरमहाकविचन्द्रसूनु—
श्रीविश्वनाथकविराजकृतं प्रबन्धम् ।
साहित्यदर्पणममुं सुधियो विलोक्य,
साहित्यतत्त्वमखिलं सुखमेव वित्त ।

उट्टङ्कितेनानेन उद्धृतांशत्रयेण दर्पणकर्त्तुः पितामहस्य, पितामहानुजस्य, पितुश्च नाम समवधारितम् ।

असौ दर्पणकारः "जयन्तं" "आलावद्दीनञ्च" स्मरति । यद्यपि प्रसिद्धदर्पणपुस्तके जयन्तस्य नाम नोपलभ्यते, तथापि प्राचीनपुस्तके "यः कौमारहरः" इति श्लोकस्य प्रपञ्चे "अत्र यज्जयन्तेनोक्तं" इत्यादिना नाम गृहीतम् । अयं जयन्तः खेष्वग्निविधुमिते (१३५०) विक्रमाब्दे काव्यप्रकाशस्य दीपिकाख्यां व्याख्यां प्रणिनाय इति तत्कृतदीपिकान्ते व्यक्तम् । आलावुद्दीनस्य नाम तु चतुर्थपरिच्छेदे "सन्धौ सर्व्वस्वहरणम्" इति श्लोके गृहीतम् ।

तथाच अतुल-शिल्पकला-परिपूर्णस्य कोणार्कमन्दिरस्य निर्मापयिता मुसलमानविजयी महाराजाधिराजः श्रीश्रीनरसिंहदेव उत्कलसम्राट् आसीत् इत्यत्र

---

* जगन्नाथपूर्व्वभागात् कृष्णातीरान्तरं शिवे । कलिङ्गदेशः सम्प्रोक्तो रामनामेपरायणः । कलिङ्गमतन्त्रम् ।

न संशयः । प्रोक्तचक्रवर्त्ती न स्तृतीयपुरुषो योद्धा श्रीश्रीप्रतापनरसिंहदेवो यवन-भूपतेरालावुद्दीनस्य प्रधानसेनापतिं काफुर-नामानं यवनं राजनीत्या स्वपक्षीकृत्य आधुनिक-मद्र-प्रदेशान्तर्गतं चोराकुलराष्ट्रमधिकर्त्तुं तेन काफुरेण सार्द्धं स्वसैन्यं तत्र प्राहिणोत् । तदानीमुत्कलखण्डस्य सीमा सुरासुरवन्दितायाः गङ्गानदीतः पुण्यसलिलां गोदावरीं नदीं यावत् प्रसृताऽऽसीत् । असौ चक्रवर्त्ती सप्तविंशत्यधिके त्रयोदशशततमे खीष्टाब्दे (१३२७) परलोकमगात् इति बहुकालस्थायिनो मादलापाञ्जिनामकाद् उत्कलेतिहासग्रन्थाद् लभ्यते ।

"श्रीनृसिंह महीपाल स्वस्त्यस्तु तव बाहवे ।"

इत्यनेन पद्यांशेन प्रतापनरसिंहदेवं प्रति विहिताशीर्व्वादात् ततश्च तस्य श्रीनरसिंहदेवस्य विजयमाश्रित्य नरसिंहविजयनामकग्रन्थविरचकत्वाच्च तदानीन्तन एव । अन्यच्च पञ्चदशाधिके त्रयोदशशततमे (१३१५) खीष्टाब्दे सुरलोकं गतवतो यवनभूपतेरालावुद्दीनस्य राजत्वमनुभूय कश्चिदेव तद्भावव्यञ्जकं–

सन्धौ सर्व्वस्वहरणं विग्रहे प्राणनिग्रहः,
आलावुद्दीननृपतौ न सन्धिर्न च विग्रहः ।

इत्यद्भुतं पद्यमिदं स्वग्रन्थे प्राह दर्पणकारः । इतिहासप्रसिद्धयोर्द्वयोरेतयोरालावुद्दीननरसिंहदेवयोः समसामयिकत्वाद् अयं विश्वनाथः खीष्टाब्दीयचतुर्दशशताब्द्या आद्यभागे विराजमान आसीत् । नात्र कस्यापि विप्रतिपत्तिः सम्भाव्या । तत्रच साहित्यदर्पणस्य सुप्रसिद्धावस्थायामेव तादृशादरदर्शी स्वीयलेखश्च प्रतिपादितकालकलनायां परं बीजम् । इत्यनेनावगन्तव्यं सम्यक् प्रत्नतत्त्वविद्भिः ।

एवञ्च यदि उत्कलाधीशस्य नरसिंहदेवस्य आसन्नमृत्युकाले दर्पणकारस्य मध्यमावस्था कल्प्यते तदा पञ्चाशद्वर्षासन्ने वयसि दर्पणनिर्माणं सम्भाव्यते । राघवविलासमहाकाव्यस्य कुवलयाश्वचरितप्राकृतमहाकाव्यस्य, चन्द्रकलाप्रभावती-नाटिकयोः षोडशभाषामय्याः प्रशस्तिरत्नावल्याश्च निर्माणानन्तरं दर्पणप्रणयनम् । साहित्यदर्पण-रचनानन्तरं विश्वनाथेन नरसिंहविजयः काव्यप्रकाशदर्पण इति ग्रन्थद्वयं निरमायीति तत्कृत-काव्यप्रकाश-दर्पणतो ज्ञायते ।

श्रीमन्नारायण-चरणारविन्द-मधुव्रत-साहित्यार्णव-कर्णधार-ध्वनिप्रस्थापनपरमाचार्य्य-कविसूक्तिरत्नाकराष्टादशभाषावारविलासिनीभुजङ्ग-सान्धिविग्रहिक-महा-

प्राच्यः श्रीविश्वनाथकविराज आसीत् खीष्टाब्दस्य चतुर्दशशताब्द्याः प्रारम्भभागे ।

पुरा लौहलेखन्या तालपत्रपुस्तके कस्माच्चित् ग्रन्थात् विषयज्ञानमुक्तेरल्प कतिपयविषमाभ्यन्तरं पुस्तकमेकं पूर्णतया ददृशुस्ते विद्वांसः । यथेदानीं विश्वजनीनां रीतिमवलम्ब्य विभिन्नमहाद्वीपमण्डलवासिनो ग्रन्थप्रकाशकाः पुस्तकालयान् तथा विपणिमहांश्च प्रति प्रस्थापयन्ति ग्रन्थान् न समभाव्यत तथा पुरा । तर्हि तदा स विश्वनाथः कथमिव बहुशो ग्रन्थानधीत्य स्वपुस्तके शतशो ग्रन्थप्रमाणानि समुट्टङ्कयति स्म तदेव चित्रम् ।

सत्सु बहुष्वलंकारशास्त्रेषु विद्वद्वर्यश्रीविश्वनाथ एकस्मिन्नेव ग्रन्थे दोष-गुण-रसादिमुख्यविषयाणामलङ्काराणामपि प्रभूतभावेन एकत्रादर्शनखिन्नमना एकाधारेऽस्मिन् दर्पणपुस्तकेऽलंकारशास्त्रीयविषयजातं यथापरिच्छेदं विन्यस्य साहित्यविदां विदुषां महोपकारं सम्पादयति स्म ।

येन विदुषा काव्यालंकारनाटकेतिवृत्तादिर्ग्रन्थनिवहो व्यरचि । येन च षोडशभाषामयी प्रशस्तिरत्नावलीनामिका पुस्तिका लिखिता । तादृशा अष्टादशभाषाभिज्ञाः पण्डिता भारते किमु पृथिव्यां वा कियन्तः परिलक्ष्यन्ते ? येनापि स्मृतिधरेण स्वयमभ्यस्य पुनस्तद्विषये षोडशभाषात्मको ग्रन्थो निर्ममे ।

बङ्गदेशे बहुभाषावित्सु विद्वत्सु कृतप्रतिष्ठः सुधीवरो हरिनाथदेमहोदय इव विश्वनाथः बहुभाषाज्ञ आसीत् । एकदा कलिकातायां संस्कृतभाषया मया पृष्टोऽसौ "दे" महोदयः "अभ्यासो नास्ति" इत्युक्त्वा बङ्गभाषया स्वाशयं वक्तुमुद्यतः । उदारधीरयं "दे" महोदय आंग्लभाषापारदर्शितया तद्भाषया विभिन्नदेशभाषापुस्तकानां समालोचनामनन्यसाधारणमतिमत्तया नितरामायत्तीकृत्य पुनश्च तत्तद्भाषाविद्वान् कतिपयमौलिकग्रन्थांश्च अभ्यस्य अपि पाण्डित्यमुपलेभे ।

विश्वनाथस्तु स्वमन्त्रसिद्धिप्राशस्त्येन तत्तद्भाषाग्रन्थेषु अधीतिबोधाचरणप्रचारणमूलकं पाण्डित्यं प्रपेदे । यत् इह तत्तद्भाषासु तदीयग्रन्थदर्शनेन तदेव सुस्पष्टमनुभवामः । एतादृशानां महात्मनां भुवि सर्व्वातिशायि तदेव पदमनन्यचिन्तनीयं खलु । तदानीं तद्विधेन विद्वद्वर्य्येण समलङ्कृता भारतभूमिरियं सुतरां भुवि कीर्त्तिवैजयन्तीमुड्डुयतेतराम् । अलं पल्लवितेन । इति शम् ।

यद्यस्मिन् विषये कैरपि सुधीवरैः कुत्रापि किञ्चन मतान्तरं परिलक्ष्यते तत् सानुग्रहं विज्ञाप्य सुखीकुर्वन्तु ते प्रकृततत्त्वविदोऽत्र भवन्तः ।

द्वैतवाद-वीरभद्रः । *

मङ्गलाचरणम् ।

किङ्करक्रियया पूष्णो यो भनक्ति पुरा रदान् ।
तमन्धकतमस्तोम-हरम्पञ्चाननं भजे ॥ १ ॥

प्रभाकरमङ्गलाचरणाद्यालोचनम् ।

तत्त्वपक्षस्वभावेन धियोऽनाकाङ्क्षता सता ।
ध्यायता भगवत्पादमथाऽद्वैत-विग्रहः ॥ २ ॥
कण्ठकुण्ठालय इति प्रश्नस्योत्तरणं यथा ।
मया न भुक्ता रम्भेति 'न द्वैवाद्' इति तत्समम् ॥ ३ ॥
अप्रतिष्ठं ह्यनिलयं शास्त्रं किञ्च गुहाहितम् ।
भ्रान्तेः पदं यथा ब्रह्मावलं तर्कस्तथोदितः ॥ ४ ॥
द्विरे शारीरके भाष्ये दरदा यत्कृताहतिः ।
कृपया प्रसादं कुरुते सोऽखिले शिवशङ्करः ॥ ५ ॥

(२) 'ध्यात्वा श्रीभगवत्पादमद्वैतानन्दविग्रहम्' । (अद्वैतप्रभाकरमङ्गलाचरणं द्रष्टव्यम् ॥) अत्र अद्वैतानन्देन विग्रहो विरोधो यस्य तं भगवत्पादम् इत्यर्थः स्वरसतः प्रतीयते । अद्वैतनये भगवैशिष्ट्यपादाद्यत्रयत्वासम्भवात् ॥ यदि चायमर्थो वक्ता न विवक्षितस्तथापि धियस्तत्त्वपक्षपातस्वाभाव्येन तथा शब्दविन्यासो जात एषोऽर्थो यथा झटित्युपस्थापितः । अर्थान्तरपरत्वे वैयर्थ्यादिदोषोऽपि जागर्त्ति । (३) 'विहितेयं विचारणा । द्वैवाद दम्भतो वापि' (प्रभाकरपद्यं द्रष्टव्यम्)

(४) शास्त्रे शङ्कागुहाढ्ये सततमतिशयं भ्रान्तियुक्तेऽप्रतिष्ठे
तर्काद्रौ हिंस्रकीर्णे प्रकटितमहिमा प्राज्ञपञ्चाननोऽसौ ।
तन्वारण्यान्तसीम्नि द्विरदरदहतो बाधिताविप्रसारः
शुद्धाद्वैत-प्रभाकृत् किरणनिकरतो यातु वृष्टिप्रसादम् ॥

इति प्रभाकरपद्यस्य व्याख्यानं चतुर्थादिश्लोकत्रयेण संक्षिप्य दर्शितम् । तथाहि अप्रतिष्ठत्वादिकं ब्रह्मणा उपनिषत्प्रसिद्धम् । असाधारणविशेषणेन ।

---

* नानादर्शन-परमाचार्य्यपूज्यपाद-श्रीयुक्तपञ्चानन-तर्करत्न-भट्टाचार्य्यमहाशयकृतद्वैतोक्ति-रत्नमालाप्रतिक्षेपाय योऽसावद्वैत-प्रभाकराख्यो निबन्धः संस्कृतभारत्यामिह प्रकाश्यते तद्रूप-वार्योऽयं सन्दर्भः ।

शुद्धाद्वैतप्रभां कृन्तन् स्वगोभिः किरणैरिव ।
अबाधितदृगाक्षेपः प्रसाद्यो वादिना ध्रुवम् ॥ ६ ॥
अप्रतिष्ठं दिशचद्रिं कललत्यप्रभाकरः ।
समयोल्लङ्घनरतो दिष्ट्या कोऽप्यत्र दृश्यते ॥ ७ ॥

ब्रह्मसमाद्दृश्यं तर्कं व्यज्यते । कामः संकल्पो विचिकित्सेत्यादिश्रुत्या शङ्कायाः सन्देहस्य या गुहा आश्रयः हृदयं, अथवा शङ्का इति करणे ल्यप् सैव गुहा तदाठ्यम् आधेयत्वसम्बन्धेन तद्विशिष्टम् । एतेन "गुहाहितं गह्वरेष्ठम्" इति श्रुत्यर्थ उक्तः । "हिंस्रकीर्णे" हिंस्रैः परगुणासहिष्णुभिः कीर्णे अनुपात्ते, अथवा हिंस्रान् कीर्णयति कीर्णं क्षिप्तं करोति तस्मिन्, नियहक्षमत्वात् तर्कस्य "तानहं द्विषतः क्रूरान् संसारेषु नराधमान् क्षिपाम्यजस्रमशुभान्" इति भगवदुक्तिश्च । अद्रिवदचलत्वाद् अद्रिरिति तद्व्याख्यानन्तु अचलमिति मूलस्थम् । तथाच ब्रह्मसम्मितं प्रमाणभूतं तर्कशास्त्रमिति प्रतिवादिवाक्यादेव भगवदिच्छाप्रयुक्तात्लभ्यते । इति प्रथमार्द्धव्याख्यानप्रपञ्चः ।

(५ । ६) द्विरदरदहतो……दृष्टिप्रसादम् इत्यर्द्धस्यार्थस्तु द्वौ रौ रकारौ यत्र तस्मिन्, तेन रकारद्वययुक्तशब्दलभ्यार्थस्य परिग्रहः द्विरेफवत्, सच शब्दः शारीरकमिति तत्र रकारद्वयं वर्त्तते । तस्मिन् दरदं रन्ध्रप्रतिपादकं हतं हननं खण्डनं येन सः । सहि सर्व्वत्र प्रसन्नदृष्टिः । तत्प्रसादप्रार्थनमधिकमिति भावः । किरणनिकरशब्दो गोसमूहबोधकः गोशब्दस्य किरणार्थकत्वात् किरणशब्देन च गवार्थलाभात् लक्षितलक्षणया वाक्यैरित्यर्थलाभः गोवाक्ययोरेकार्थकत्वात् । अथवा किरणनिकरतः द्वैतोक्तिरत्नमालाकिरणनिकरैरित्यर्थः स्फुटत्वात् न मूले दर्शितः । शुद्धाद्वैतप्रभाकृत् शुद्धाद्वैतप्रभां कृन्ततीति तादृक् शुद्धं प्रभाकरकरपूतं यदद्वैतं तत्प्रभां तत्प्रकाशम् । शुद्धश्च अद्वैतप्रभाकृच्च इति वा, कृती च्छेदने इति धातोरूपं कृदिति अबाधितादिप्रसार इत्यकारप्रश्लेषाद् अबाधितदृगाक्षेप इत्युक्तं मूले इति ।

(७) तर्कोद्रावित प्रभाकरपक्षे रूपकं वक्त्रभिप्रेतं तत्राप्रतिष्ठमिति विशेषणमयुक्तम् अद्रेः सुप्रतिष्ठत्वेन अप्रतिष्ठत्वस्य बाधात् । परन्तु पुरा किल—

मोहातिरेकसंच्छन्नसदसद्भेददर्शनः ।
रत्नमालां क्षिपत्येव वारणो वा नरोऽपि वा ॥ ८ ॥

यद्बालतेजसैव को हतश्रीकः प्रभाकरः ।
तत्पञ्चाननसद्रत्नमालातेजो विशिष्यते ॥ ९ ॥

कश्चिन्महावीरो गन्धमादनमद्रिमुद्धृत्य प्रभाकरञ्च कक्षे स्थापयन् समयविशेषे तल्लङ्घनपरोऽभूदिति प्रसिद्धिरस्ति । न दुष्येदिति समयं प्रतिज्ञामुल्लङ्घ्य वाचो भङ्ग्या दुष्यं प्रकटय्येति भावः अद्रिमप्रतिष्ठं ज्ञापयन् अद्वैतप्रभाकरञ्च स्वावासे दर्शयन् कोऽपि दृश्यते, भाग्यमेतद् द्रष्टव्याम् ।

(९) "नवाप्यन्यप्रभोद्दीप्ता रत्नानां मालिका स्वतः । शक्नोति स्पर्द्धितुं गुर्व्वीं स्वप्रकाशप्रभां रवेः" । इति प्रभाकरपक्षस्योत्तरम् बालः केशः यदीयबालसम्भवस्य वीरभद्रस्य ओजसा सूर्य्यः हतश्रीकः दक्षयज्ञसमये नेत्रादिहान्या श्रीभ्रष्टोऽभूत् तस्मिन् पञ्चानने शिवे सत्या वर्त्तमानाया रत्नमालायास्तेजः कीदृक् भवितुमर्हति इति विचारय, अथ च यदीयो बालो बालकः तस्माज्जातमोजः सामर्थ्यं तज्जातनिबन्धस्य ओजो वा तेन प्रभाकराख्यो निबन्धः हतश्रीकः तस्य पञ्चाननस्य रत्नमालाकृतः सद्रत्नमालातेजो विलक्षणं भवति ।

द्वैतवादवीरभद्रः ।

प्रथमो दण्डः ।

अथ साध्यो न सम्भवीत्यादिप्रभाकरोक्तिर्दूष्यते । (संस्कृतभारती-प्रथमस्य प्रथमभाग-प्रथमसंख्यांश-पञ्चाशत्तम-पत्रादवलोक्यतां) प्रथमकारिकार्थदूषणन्तु तद्व्याख्यानमाश्रित्य पश्चात् करिष्यते क्रमव्यत्ययबीजन्तु धर्म्मस्याभ्यर्हितत्वम् ।

धर्म्मद्वयं यदाचार्य्यैर्गीताभाष्ये प्रदर्शितम् ।
पारम्पर्य्येण साक्षाच्च तदद्वैतोक्तिरक्षितम् ॥ १ ॥

उक्तं हि श्रीभगवच्छङ्कराचार्य्यचरणैः, "द्विविधो हि वैदिको धर्म्मः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्चेति" । "स भगवान् सृष्ट्वेदं जगत् तस्य च स्थितिं चिकीर्षुः मरीच्यादीन् अग्रे सृष्ट्वा प्रजापतीन् प्रवृत्तिलक्षणं वेदोक्तधर्म्मं ग्राहयामास ततोऽन्यांश्च सनकसनन्दनादीनुत्पाद्य निवृत्तिधर्म्मं ज्ञानवैराग्यलक्षणं ग्राहयामासेति" च गीताभाष्योपक्रमणिकायाम् । यदीमं ज्ञानवैराग्यलक्षणं निवृत्तिधर्म्ममद्वैतबोधकभाष्यादेरनधिगम्यं मन्यमानैराक्षेपोऽयम् ।

समुद्भाव्यते तदकामैरप्यद्वैतवादस्य निष्फलत्वमङ्गीकर्त्तव्यं भवति । ज्ञानद्वारैव हि वाक्यस्य फलाभिसम्बन्धः । अथाधिगम्यं कथं नाम धर्म्मस्थापनहेतव

इति द्वैतोक्तिरत्नमालासूक्तमालिख्यते श्रीमता । यद्यद्वैतवादस्य निष्फलत्वं भवतु मा वा द्वैतोक्तिरत्नमालामतन्तु खण्डितमिति वैतण्डिको ब्रूयात्, तच्च तस्याधिष्ठान-शाखासमुच्छेदनन्याय एव शास्ता जागर्त्ति तथाहि तत्राचार्य्यपादानां सन्दर्भः, 'वैदिकं हि धर्म्मद्वयम् अर्ज्जुनाय शोकमोहोदधौ निमग्नायोपदिदेशेति' । तच्च धर्म्मद्वयं सांख्यं योगश्चेति, सांख्यमद्वैतज्ञानमित्याचार्य्यपादानां मतव्यक्तिः तदुपदेशस्य निष्फलत्वेनाङ्गीकुर्व्वतामाचार्य्यपादमताश्रितम्मन्यानां स्वाधिष्ठान-शाखानिर्म्मूलनं भवति नवेति विचारयन्तु सुधियः । योऽसौ प्रवृत्तिलक्षणो धर्म्मः सोऽपि सौगतादिकुतर्कसमाक्रान्तः साहसिकनिपीड्यमान इव गृहस्थो यावन्म्लानि-माप्नोत् तावद्राजेव भगवानाचार्य्यः साहसिकानिव कुतर्कान् दण्डेनेवाद्वैत-विचारेण दूरीकृत्य गृहस्थमिव प्रवृत्तिधर्म्मं संस्थापयामास उपदर्शितस्तत्प्रका-रश्चास्मत्परमगुरुभिर्भगवदुदयनाचार्य्यैरात्मतत्त्वविवेकेऽपि, स च यथा "अस्तु तर्हि शून्यतैव परमार्थो निर्व्वाणं इति चेन्न सा हि यद्यसिद्धा कथं तदवशेषमपि विश्व-मभिधीयते, परतश्चेत्सिद्धा परोऽप्यभ्युपगन्तव्यः स च परो यदि संवृतिरेव विश्वशून्यतया न कश्चिद्विशेषः, कथं तदप्यवशिष्येत ? असंवृतिरूपश्चेत्परः परत एव सिद्धावनवस्था, स्वयमसिद्धश्चेत् कथं शून्यत्वमपि साधयेत्, स्वतः सिद्धश्चेत् आयातोऽसि मार्गेण;-तथाहि स्वतः सिद्धतया तदनुभवरूपं शून्यत्वादेव न तस्य कालावच्छेद इति नित्यम् अतएव न देशावच्छेद इति व्यापकम् अतएव तद्वि-द्धर्म्मेकमिति विचारासहं, तस्य धर्म्मधर्म्मिभावमुपादाय प्रवृत्तेः; अतएव विशेषा-भाव इत्यद्वैतं, प्रपञ्चस्यापारमार्थिकत्वादेव निष्प्रतियोगिकमिति विधिरूपम् अविचारितप्रपञ्चापेक्षया तु शून्यमिति व्यवहारः तथापि प्रपञ्चशून्यस्य अनुभव-मात्रस्य प्रपञ्चेन कः सम्बन्धः ? नचायं प्रकाशते इति चेत् वस्तुतो न कश्चित्, संवृत्या तु गगनगन्धर्व्वनगरयोराधाराधेयभाव इव विषयविषयिभावः स च यथा-नैयायिकैः समर्थयिष्यते तथैव वेद्यनिष्ठत्वमात्रमस्मिन् दर्शने इति विशेषः । अविद्यैव हि तथा तथा विवर्त्तते यथा यथा अनुभाव्यतया व्यवह्रियते, तत्तन्मायो-पाधिभेदाच्च अनुभूतिरपि भिन्नेव व्यवहारपथमवतरति तदास्तां तावत् किमार्द्रक-वणिजो वहित्रचिन्तयेति तस्मादनुभवव्यवस्थितौ अनात्मापि स्फुरति इत्यवर्ज्जनी-यमेतदिति" अस्यायमर्थः-शून्यवादिबौद्धः प्रत्यवतिष्ठते अस्तीति, तत् परिहरति स्वेति शून्यता असिद्धा सिद्धा वा ? असिद्धा चेत् तस्या अवशेषत्वं न सम्भवति यथा भवन्मते तत्त्वतो विश्वमसिद्धमिति तत् परिहाय शून्यतायां पर्य्यवसानं तथा

शून्यतापि यद्यसिद्धा तदा विश्वेन सह शून्यतायाः समानत्वात् तत्र पार्थक्यमाना-भ्युपगमो न युक्तः यदि परतः सिद्धा कोऽसौ परः? संवृतिरविद्या तद्रूपः परः ततश्च सिद्धा चेत् विश्वमपि ततः सिद्धमिति भवदभ्युपगमः तथाच पुनस्तयोः समानत्वम् अन्यश्चेत् परः? सोऽपि असिद्धः सिद्धो वा? यद्यसिद्धः कथमन्यं साधयेत् परतः सिद्धश्चेत् एवं रीत्या अनवस्था, स्वतः सिद्धश्चेदसंवृतिरूपः परोऽभ्युपगम्यते देवानां प्रियेण, वैराग्यसाधनभूते न्यायसिद्धान्तमहानगरमुपतिष्ठमाने वर्त्मन्युपगतं नतु महानगरसमीपे समागतमिति बोधयितुमुक्तवायातोऽसि मार्गेणेति किन्तह् वर्त्मनि बोधयितुमद्वैतमतमादावनुवदति। तथाहीति। परस्य स्वतः सिद्धत्वा-भ्युपगमे तेन परेणापि शून्यात्मना भवितव्यम् अन्यथा स्वसिद्धान्तभङ्गः, शून्यतैव वा स्वतः सिद्धा वाच्या, यथा भवतु यत्तु स्वतः सिद्धं तदेव ज्ञानं नहि ज्ञानाद-न्यत् स्वप्रकाशकमस्ति तस्मिंश्च भवदभ्युपगते शून्यात्मनि कालदेशावच्छेदा-द्यसम्भवात् नित्यत्वव्यापकत्वे, तत्र च भवदभ्युपगतेनैव धर्म्मधर्म्मिभावविरहेण सामान्यविशेषभावासम्भवादद्वैतरूपता। तच्चाद्वैतं भवदभ्युपगतया प्रपञ्चस्यालो-कतया अलीकप्रतियोगिकाभावस्य अस्मन्मतसिद्धतया भावरूपमेव भवति। आत्मनः उपासनादिदशायाम् अविचारितो विचारदशामनुपनीतो यः प्रपञ्च-स्तस्याक्षेपात् अनवभासनात् शून्यमिति व्यवहारः नतु वास्तवं शून्यमपि। अतो न शून्यत्वं परमार्थनिर्व्वाणं किन्तु प्रदर्शितप्रकारं नित्यज्ञानलक्षणमद्वैतं ब्रह्माख्यं वस्तु तदिति। अत्र सौगतः शङ्कते तथापीति, सत्येन ज्ञानेनालीकस्य प्रपञ्चस्य सम्बन्धो न सम्भवति अथच तथा भासते इत्यनुपपन्नमिति शङ्कार्थः। उत्तरयति वस्तुगत्येति अविद्याकृतोऽयं सम्बन्धः स च विषयविषयिभावः स तु नैयायिकैरस्माभिः समर्थयिष्यते। विशेषस्तु स हि सम्बन्धोऽद्वैतनये न ज्ञाननिष्ठः किन्तु ज्ञेयमात्रनिष्ठः इत्यादिरीत्या निरस्तं सौगतं पुनर्विवक्षुमिव बुद्ध्वा प्रतिषे-धति तदास्तामिति। आर्द्रकवणिजः तवेति शेषः, वहित्रचिन्तया वहित्रं कीदृक् कियन्मात्रं केन पथा तद् गमिष्यति इत्यादि तत्स्वरूपतत्सङ्गत्यादिगोचरया चिन्तया किं फलम्। द्वीपान्तरपण्यनीयद्रव्यार्थं वहित्रचिन्ता न ह्यार्द्रकं तथा तद्धि सूर्पादिष्ववस्थाप्य स्वपरिसर एव विक्रीयमाणोऽस्त्युपजीवितोपहासवाक्यमिदं। शून्यतामात्रवादिनस्ते नित्यज्ञानपक्षसङ्गत्यादिचिन्ता हास्यायैवेति तत्त्वे, वादि-निग्रहाय तत्रैव वाक्स्तम्भनचातुरी बहुधोपदर्शिता न्यायाचार्य्यचरणैः नचार्द्रकव-णिज इत्यस्य अमेति शेषो भवतु, अद्वैतविचारे स्वस्यानधिकारद्योतनाय इति

वाच्यं तथा कल्पने स्वपक्षस्यैव हीनत्वप्रसङ्गात् निजानधिकारख्यापनेन विचारवि-
रतेः स्वपक्षस्यैव निग्रहस्थानयोग्यत्वात् । नचैवमपि स एवाद्वैतसिद्धान्तो मुख्य
इति न्यायाचार्य्यमतमिति शङ्कनीयम् अनुभवव्यवस्थितावनात्मनः स्फुरणावर्ज्जन-
स्याद्वैतमतविरुद्धस्याचैवोक्तत्वात् यत्साक्षादपरोक्षाद्ब्रह्मेति श्रुतेः स्वप्रकाशब्रह्मानु-
भवस्यानात्मस्फुरणमन्तरेणापि सम्भवात् स्वमते च तत्सम्भवेन तथैवोपसंहारात्
अत्र व्यवस्थिताविन्यनेन तत्र व्यवहारदशामात्रं बोध्यते इति वाच्यं, परमार्थतः
शून्यता खण्डनोपक्रमे व्यावहारिकानुभूतिमात्रोपसंहारस्यासङ्गतत्वात् । किञ्च
"उपास्यमाने तस्मिन् प्रथमं बहिरर्थ एव भासते यमाश्रित्य धर्म्ममीमांसोपसंहार
इत्युपक्रम्य ततः केवलात्मा प्रकाशते यमाश्रित्याद्वैतमतोपसंहारः, तत्प्रतिपा-
दनार्थञ्च न पश्यतीत्यादि । तद्धानार्थं नाद्वैतं नापि च द्वैतमित्यादि ।
ततः समस्तसंस्काराभिभवात् केवलोऽपि न विकल्प्यते यमाश्रित्य चरमवेदान्तोप-
संहारः तत्प्रतिपादनार्थं यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सहेत्यादि । सा चा-
वस्था न हेया मोक्षनगर-गोपुरायमाणत्वात्, निर्व्वाणन्तु तस्याः स्वयमेव यदाश्रित्य
न्यायदर्शनोपसंहारः" इति न्यायाचार्य्यचरणसन्दर्भेण तस्य हेयत्वप्रतिपादनात् ।
नच चरमवेदान्तोपसंहारोऽद्वैतमतोपसंहारश्चैकः, तथा सति एकान्तरपौर्व्वापर्य्येण
तयोरुपन्यासो हानाहानताप्रतिपादनञ्चाचार्य्यपादानामसङ्गतं स्यात्, एवञ्च
सर्व्वशास्त्रशिरोमणिभूतं न्यायशास्त्रं यस्य निर्व्वाण एवोपसंहारः इति न्याया-
चार्य्यपादसिद्धान्तः ततो हेयमप्यद्वैतमतं सौगतमतापेक्षया समुपादेयं सौगतैर-
चिन्तनीयप्रकर्षञ्चेति न्यायाचार्य्यमतमस्मद्गुरुभिरपि सबहुमानमङ्गीक्रियते
तदेव द्वैतोक्तिरत्नमालाप्रथमकारिकादौ विवृतम् । तस्माद्द्वैतमतं तथ्यं भवतु मा वा
सम्मतानुवर्त्तिजल्पेन सौगतमतनिरासः तेन च श्रौतस्य प्रवृत्तिधर्म्मस्यापि संस्था-
पनमिति सुष्ठूक्तं रत्नमालायां "धर्म्मस्थापनहेतवे" इति । नचाद्वैतमतपरिणति-
स्तद्धर्म्मविरोधिनीति य एव रक्षकः स एव भक्षकः इत्यस्य कुतो धर्म्मस्थापनहेतुत्व-
मिति शङ्कनीयम्, अपशूद्राधिकरणे अग्निहोत्राधिकरणे विद्याज्ञानसाधनाधि-
करणादिषु च व्यक्ताव्यक्तभावेन कर्म्मणि ब्रह्माधिगमप्रयोजकतायाः प्रतिपादितत्वेन
विरोधाभावात् .ज्ञानदशायां कर्म्मासम्भवस्तु द्वितीयाश्रमदशायां प्रथमाश्रम-
धर्म्मासम्भववदनुचिन्तनीयः । सत्यपि प्रतिपाद्यभेदे न खलु गार्हस्थ्यधर्म्मप्रतिपाद-
कशास्त्रं ब्रह्मचारिधर्म्मप्रतिपादकशास्त्रेण केवलं विरुध्यते, किन्तु परस्परमु-
पकुरुते परस्परस्य एवं साक्षात् पारम्पर्य्येण च धर्म्मसंस्थापनहेतुरद्वैतोपदेशस्त्यत-

एव प्रभाकरप्रमाणभूतपुराणवचनं…"महेश्वरः । करिष्यत्यवतारं स्वं जम्बुद्वीपे कलौ युगे । दुष्टानां निग्रहार्थाय शिष्टानां रक्षणाय चे"ति । नहि शिष्टरक्षणं धर्म्मस्थापनमृते सम्भवति यस्य च धर्म्मद्वयस्य लक्षणं भगवता महर्षिकणादेन कृतं "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म्म" इति। आत्मदर्शनस्य परमधर्म्मत्वञ्चोक्तं स्मृतिषु अयञ्च परमो धर्म्मो यद् योगेनात्मदर्शन' मिति अत्रापि यथा जैमिनीय-धर्म्मलक्षणं समन्वेति तदपि सत्यवसरे दर्शयिष्यामः एवं सत्यप्यद्वैतमतस्य धर्म्मस्थापनहेतुत्वे द्वैतवादिभिरप्यभ्युपगम्यमाने यच्छङ्कराचार्य्यमतरक्षकम्मन्यै-स्तदनभ्युपगतं तेनोच्यते ।

अद्वैतदेशिनां बालः पितुर्नैष्ठिकतामिव ।
धर्म्मप्रतीपतां मोहादहो जल्पन्न लज्जते ।

(क्रमशः)

पुरी-वेदविद्यालयः ।

अस्ति तावल्लवणाम्भोनिधेस्तीरे जगन्नाथमन्दिरमण्डितं प्रचारकवृन्द-वन्दितं बड़दाण्डाख्येन घण्टापथेन परिशोभितं पुरुषोत्तमक्षेत्रम् । यत्र भक्तजन-मानसपूरको जगन्नाथः स्वयमवतीर्य्य श्रुतेः साम्यवादं सम्पादयन् पवित्रीकरोति प्राणिजातम् ।

तत्र पण्डितकुलपतिर्महामहोपाध्यायः श्रीसदाशिवमिश्रमहाशयो बहु-पुण्येन अस्मिन्नुत्कलखण्डे प्रादुर्भूय स्थाने स्थाने विद्यालयस्य संस्थापकतया देशविदेशागतानाम् निर्धनानामन्तेवासिनामर्थव्ययं विना शिक्षाया व्यवस्थापक-तया देशविदेशागतानां सुधीश्वराणां धर्म्माचार्य्याणां प्रश्नपत्राण्याकलय्य यथो-चितं तत्समाधिपो व्यवस्थापत्रप्रेषणेन, तथाच स्मृतिवेदान्तश्रेणीप्रभृतीनां नाना-विधानां हितकरानुष्ठानानां प्रवर्त्तकतया यो भूभागमिममुत्कलस्यालङ्करोति ।

कर्म्मवीरः सोऽत्रभवान् महामहोपाध्यायः आर्य्यवर्य्याणां वैदिकयुगप्रव-नस्य भारतवर्षस्य पूर्व्वावस्थां क्षयोन्मुखीं मन्यमानः तत्पुनस्तदुन्नतिमनाः पुरीन-गर्य्यां ऋषिवाङ्कब्रह्ममिते (१९०७) खृष्टाब्दे वेदविद्यालयमेकं संस्थाप्य तत्र सुदक्षं शिक्षकद्वयं न्ययुंक्त । तत्र कुलीनोऽयं प्रथमाध्यापकः यज्ञविद्याविशारदतया कर्म्मठतया वेदवेदाङ्गपारदर्शितया च विभूषयति तत्पदम् । अथ छात्रवृद्धये भृशं यतमानः स महामहोपाध्यायमहाशयो बहुद्विजमन्दिरं स्वयमुपगम्य तदभि-

भावकान् मधुरया गिरा प्रबोध्य तत्तदात्मजान् तद्विद्यालयं प्रति प्रोत्साहयति।

तत्राधुना त्रिंशत् छात्राः। १९१४ खृष्टाब्दतः १९१८ खृष्टाब्दपर्य्यन्तम् अवसरेऽस्मिन् यथानियमं शिक्षाविभागस्य प्रेषितेभ्यः तेभ्योऽन्तेवासिभ्यश्चतुश्चत्वारिंशत्संख्यकेभ्यः परीक्षासु सप्तविंशत्या सुफलता लब्धा। तेष्वेके सह वृत्त्या समुत्तीर्णाः। पुनस्तद्धेतुकतया शिक्षकयोरनयोर्यथेष्टं पारितोषिकं परिदृश्यते।

अत्र विद्यालये उपनिषद्भागकर्म्मकाण्डवेदयोगादिषु शास्त्रेषु शिक्षा विहिता। विद्यार्थिनो विदुषोऽनुवर्त्तमानाः सततं विद्यालयमधिष्ठाय ब्रह्मचारिव्रतमनुभवन्तः सकलशास्त्रविधिं मुख्यतया कार्य्यतोऽवलम्बेरन्।

एतदर्थं स्थायिगृहाभावात् शङ्कराचार्य्यमठादौ स्थाने कियतो दिवसान् विद्यालयकर्म्म कृच्छ्रेण सम्पादयन् स परिचालकमहाशयस्ततः वारिधेर्वेलायां 'मिर्जानसिप्यालिटि'सभापक्षतः भूमिखण्डमेकमादायालयं प्रारभत। तदर्थं बहुचेष्टया बामण्डानृपतेरेकादशशतं मुद्राः, रायबहादुरोपाधिकात् श्रेष्ठिनो रामगोपालमालव्यात् सहस्रमेकं, स्वर्णपुरमहाराजतः शतपञ्चकञ्च साहाय्यमलभत।

इत्थं नानाचेष्टया पूर्णतां न गतवति तस्मिन् निलये तत्प्रार्थनया माननीयो विहारोत्कलाधीशः सम्मतोऽपि सामरिकव्ययबाहुल्यात् नितरां निवृत्तः। तदनन्तरं महाराजोपाधिकं वदान्यं 'काशिमबाजार'नराधीशं मणीन्द्रचन्द्रनन्दिमहोदयम् प्रपन्नः। धर्म्मवीरः सोऽपि विद्यालयस्यास्य अवशिष्टांश-निर्म्माणार्थं प्रभूतं वित्तं प्रदाय गृहं निर्म्मापितवान्।

अथ मुक्तिमण्डपपण्डितसभया ससम्मानं समाहूतोऽसौ स्वयं बङ्गदेशादागत्य कतिपयैः सुशिक्षितैः सह तदागारस्य द्वारोद्घाटनमहोत्सवं विहितवान्। प्रोक्तपण्डितसभायाः महामहोपाध्यायप्रमुखः सुधीवरो धार्मिकाय महाराजाय तस्मै हार्द्दिकं आशीर्व्वादमुपाधिमेकं प्रायच्छन्।

अधुना प्रोक्तविद्यालयः स्वकार्य्यपरिचालनार्थं प्रतिमासं द्व्यशीतिराजतमुद्राः अपेक्षते, तस्य कृते विहारोत्कलीयो राजकोषः प्रतिमासं द्वाविंशति राजतमुद्राः अष्टदुर्गाधीशो दशराजतमुद्राः मेदिनीपुरविभागीयो नराजोलाधीशो दशराजतमुद्राः तथाच मुक्तिमण्डपपण्डितसभा अवशिष्टाश्चत्वारिंशतं राजतमुद्राः प्रयच्छन्ति। अनया रीत्या परिचालितोऽयं वेदविद्यालयः मर्त्त्यवैकुण्ठेऽस्मिन् पुरुषोत्तमक्षेत्रे वेदचर्च्चां यथोचितं प्रकटयन् महोपकारं सम्पादयति। इत्यलम्।

श्रीश्रीसरस्वत्यै नमः ।

संस्कृतभारती

भागः २, ४र्थवर्षम्] १३२६ मितवङ्गाब्दस्य ४र्थांशे [संख्या ४

स्तोत्रस्तवकम् ।

श्रीगणेशस्तवः ।

श्रीवाराहपुराभिधासरसिजं श्रीशादिदेवार्चितं
श्रीबिल्वान्तिकवासिनं श्रितवतां श्रीभुक्तिमुक्तिप्रदम् ।
श्रीगोपालधरामरार्चितपदं श्रीमद्गिरीशार्भकं
श्रीनारायणतीर्थयोगिविनुतं श्रीदन्तिवक्त्रं भजे ॥ १ ॥

ज्ञानाज्ञानकृतं विभो जननमारभ्येयताऽनेहसा
यद्धन्यामकपातकं गजमुख त्वं तत्तदुन्मूलय ।
सर्वाभीष्टसमर्पणैकनिपुणं त्वत्पादपंकेरुह-
ध्यानं मे हृदि सन्ततं विलसतात्कारुण्यवारांनिधे ॥ २ ॥

यस्मिन्बालगजानने निजपितुर्वामांगजानेः पुरः
कुक्षिं गाढमतिप्रियेण परिरभ्योत्संगवर्त्तिन्यभूत् ।
यत्कुंभौ गिरिजास्तनान्तिकजुषौ वीक्ष्य त्रिभिः स्वैर्मुखैः
स्कन्दः स्तन्यपिपासयोत्सुकमनास्तं दन्तिवक्त्रं भजे ॥ ३ ॥

कदलीपनसेक्षुमोदकाम्रं
दधतं हस्तसरोरुहैर्दयाब्धिम् ।
उदयोन्मुखबालसूर्यदीप्रं
वरदं बालगजाननं प्रपद्ये ॥ ४ ॥

आधिव्याधिशतैर्निपीडिततनुं दौर्गत्यभूतास्पदं
प्राक्कालीनमहाघसंघविहितस्वात्मावबोधं च माम् ।

हे हेरम्ब गजाननार्त्तिहरण क्षेमंकर त्वत्पदां-
भोजं संस्मरतां नृणामवतु ते नेत्रान्तपातः शुभः ॥ ५ ॥

हे मातर्वेत्थ किं हे जननि मम सदा कर्णतालं विकर्ष-
त्येष स्कन्दः किमर्थं कटवदिह लुठित्वापयामीति जल्पन्
किं त्वं स्कन्दाग्रजं सं प्रतुदसि तुद मा दुष्ट गच्छेति देवी
गौरी प्रवृक्रमाह त्रिपथवदनमुदा तं भजे शान्तमूर्त्तिम् ॥ ६ ॥

खण्डं क्षुधापूपकपित्थशालि
स्वदन्तपाशेक्षुवरान् कराब्जैः ।
समावहन्तं तरुणारुणाभं
श्वेतगढवक्त्रं सततं प्रपद्ये ॥ ७ ॥

क्षोदीयांसं मनुजहतकं किल्बिषौघावतारं
मित्रद्रोहाकलनविषये धीरमग्रायगण्यम् ।
आत्मोत्कर्षं परमभिदधानं बहिर्वैदिकाभं
क्षिप्रं धीरेभवक्त्र तपयतु सभवान् मत्प्रतिद्वन्द्विसंघम् ॥ ८ ॥

हे विघ्नराज कनकाचलधन्वसूनो
लम्बोदराश्रितजनौघदयापयोधे ।
मामखिलरोगपरिखेदितचित्तवृत्तिं
दीनं त्वदीयपदपद्मगतिं च पायाः ॥ ९ ॥

नालिकेरगुडपायसरंभा-
श्चूतमप्यभिनवं करपद्मैः ।
बिभ्रतं हिममयूखनिभाङ्गं
त्वां भजामि हृदि भक्तगणेशम् ॥ १० ॥

श्रीवाराहपुराधिवासरसिकं हेमाब्जिनीतीरगं
नित्यानन्दपदप्रदं प्रतिदिनं भूदेवसंघार्चितम् ।
भक्ताभीप्सितदानकल्पकतरुं कारुण्यपाथोनिधिं
भोगीन्द्राभरणं त्रिनेत्रतनयं वन्दे गणानां पतिम् ॥ ११ ॥

देव त्वमेव जननी जनकश्च बन्धु-
स्त्वं मे धनञ्च कुलदैवतमप्यजस्रम् ।

त्वन्नामकीर्त्तनमिदं मम वाचि सर्व-
वाञ्छाप्रदाननिपुणं भवतात्गणेश ॥ १२ ॥

वेतालं शरकार्मुकासिपरशून् चक्रांकुशौ मुद्गरं
शक्तिं शूलगदाध्वजान् वरगुणं कुन्तञ्च खट्वांगकम् ।
बिभ्राणं करपंकजैस्सततमारक्तांगशोभं मुदा
भक्ताभीष्टवरप्रदानरसिकं वीरं गणेशं भजे ॥ १३ ॥

दुष्टं दुर्दान्तचित्तं दुरभिजनभवं दुर्व्ययध्वस्तवित्तं
दुष्कर्मावासभूमिं दुरितशतनिधिं दुर्मतिं दुःस्वभावम् ।
दुर्मन्त्राभ्यासलोलं बहिरपि दुरहंकारभूयिष्ठचित्तं
दूरादुन्मूलय त्वं गजवदन मम द्वेषिणं दुर्जनाख्यम् ॥ १४ ॥

कृष्णानामकमहीसुरवर्याराध्यपादसरसीरुहयुग्मम् ।
पार्वतीगिरिशहार्दविवर्त्तं सिन्धुराननमिमं कलयेऽहम् ॥ १५ ॥

हरितततनुरुचं प्रसन्नवक्त्रां निजदयितां परिरभ्य मोदमानम् ।
विमलघुसृणवर्णदेहकान्तिं भवभयवारकमाश्रये गजास्यम् ॥ १६ ॥

मन्दारमालापरिशोभिकण्ठं वृन्दारकौघार्चितपादपद्मम् ।
मन्दान्तरङ्गानुजिघृक्षयेह स्कन्दाग्रजं भान्तमिमं प्रपद्ये ॥ १७ ॥

कमण्डलुं पुस्तकमक्षमालां दण्डञ्च हस्तैर्दधतं सितांगम् ।
मुखैश्चतुर्भिः परिशोभमानं भजे गजास्यं द्विजविघ्नराजम् ॥ १८ ॥

निजस्वरूपं निगमैकवेद्यं केनापि कामेन विचिन्तयन्तम् ।
सत्कर्मनिष्ठं परिशुद्धगात्रं भजे द्विजाख्यं गणनाथमीशम् ॥ १९ ॥

निखिलविबुधलोकस्तूयमानप्रभावं
स्तुतिशतनतिगीताधायिमर्त्यप्रियं तं ।
भुजगवरविभूषं भूतनाथाभिनन्द्यं
कलभ-वदनमीडे कल्मषध्वंसनाय ॥ २० ॥

(क्रमशः ।)

लक्ष्मीस्तोत्रम् ।

इन्द्र उवाच ।

नमस्ये सर्व्वभूतानां जननीमब्जसम्भवाम् ।
श्रियमुन्निद्रपद्माक्षीं विष्णोर्व्वक्षःस्थलस्थिताम् ॥
त्वं सिद्धिस्त्वं सुधा स्वाहा स्वधा त्वं लोकपावनि ।
संध्या रात्रिः प्रभा भूतिर्म्मेधा श्रद्धा सरस्वती ॥
यज्ञविद्या महाविद्या गुह्यविद्या च शोभने ।
आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी ॥
आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्त्वमेव च ।
सौम्यासौम्यैर्ज्जगद्रूपैस्त्वयैतद्देवि पूरितम् ॥
का त्वन्या त्वामृते देवि सर्व्वयज्ञमयं वपुः ।
अध्यास्ते देवदेवस्य योगिचिन्त्यं गदाभृतः ॥
त्वया देवि परित्यक्तं सकलं भुवनत्रयम् ।
विनष्टप्रायमभवत् त्वयेदानीं समेधितम् ॥
दाराः पुत्रास्तथागारं सुहृद्धान्यधनादिकम् ।
भवत्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणाम् ॥
शरीरारोग्यमैश्वर्य्यमरिपक्षक्षयः सुखम् ।
देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्ल्लभम् ॥
त्वं माता सर्व्वभूतानां देवदेवो हरिः पिता ।
त्वयैतद् विष्णुना चाम्ब जगद् व्याप्तं चराचरम् ॥
मा नः कोशं तथा गोष्ठं मा गृहं मा परिच्छदम् ।
मा शरीरं कलत्रञ्च त्यजेथाः सर्व्वपावनि ॥
मा पुत्रान् मा सुहृद्वर्गं मा पशून् मा विभूषणम् ।
त्यजेथा मम देवस्य विष्णोर्व्वक्षःस्थलालये ॥
सत्त्वेन सत्यशौचाभ्यां तथा शीलादिभिर्गुणैः ।
त्यज्यन्ते ते नराः सद्यः सन्त्यक्ता ये त्वयामले ॥
त्वयावलोकिताः सद्यः शीलाद्यैरखिलैर्गुणैः ।
कुलैश्वर्य्यैश्च युज्यन्ते पुरुषा निर्गुणा अपि ॥
स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् ।
स शूरः स च विक्रान्तो यस्त्वया देवि वीक्षितः ॥

सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः ।
पराङ्मुखी जगद्धात्रि यस्य त्वं विष्णुवल्लभे ॥
न ते वर्णयितुं शक्ता गुणान् जिह्वापि वेधसः ।
प्रसीद देवि पद्माक्षि मास्मांस्त्याक्षीः कदाचन ॥

श्रीश्रीभगवत्-प्रसङ्गः ।

श्रीकण्ठालिङ्गनेन प्रमदभरपरिभ्राजमानाननश्री-
धाम्ना स्वेनैव दूरीकृतवलिदनुज-प्रोद्यदैश्वर्यराशिः ।
शश्वद्विश्वैकमाता निरतिशयलसच्छद्मपाशीजपाणि-
गौरी वा शौरिराशु प्रणयतु निखिलप्राणिनां प्रीणनानि ॥
प्रभो, यदि समीहसे स्वविभुभावमव्याहतं
तदा सपदि योजय त्वयि ममेह मूर्त्ते मनः ।
व्यथेत विभुतान्यथा तव भवेश ! यस्मादियं
सुधीभिरभिधीयते सकलमूर्त्तसंयोगिता ॥
भूतिविभूषितमपि यं गायति विद्वानभूतिकत्वेन ।
मृडमुडुपरिवृढचूडं तमनीशमीडे प्रपन्नोऽहम् ॥
समाकुल-कुलावलाकुल-दुकूलराशिं हरन्,
कलिन्दतनयातटे निभृतनीपशाखां श्रयन् ।
स्मिताननसरोरुहे मधुरवेणुमारोपयन्
अपायदवपावकादवतु कोऽपि गोपीपतिः ॥
तमःस्तोमं सद्यस्त्रिभुवनतापनद्धं शमयितुं
समर्था या शुद्धद्रुतकनककान्ति-प्रतिनिधिः ।
द्युतिः सा काचिन्मे स्फुरतु तुहिनाद्रिप्रकटिता
अहस्सारेऽजस्रं गृहपतिसहस्रोज्ज्वलवपुः ॥

समस्यापूरणम् ।

(क)—भेदो दुरन्ता बलवद्विरोधिता ।
स्मितास्यगर्व्वं हतावधीरया
कुपक्षपक्षोदितकर्वरीपतिः ।

वधूभयायाश्च करं विधारय-
न्यहो दुरन्ता बलवद्विरोधिता ॥

(ख)–प्रविशति जलमध्ये शीतभीता मृगाक्षी ।
पतति शिशिरबिन्दुर्हृदयान्तं विभिन्दन्
वहति मुहुरशेषः शीतलो मातरिश्वा ।
उचितवसनहीना मर्त्तुकामाऽतिदीना
प्रविशति जलमध्ये शीतभीता मृगाक्षी ॥

(ग)–चन्द्रः प्रवालप्रभः ।
निर्यातेषु सखीजनेषु भवनादुद्वाहरात्रौ लसत्-
सिन्दूराढ्यललाटशेखरदुहितुर्व्रीडा-विमग्नीकृतम् ।
किञ्चित्-कुञ्चितलोचन-स्मितमुखं स्वामीदमाचुम्बतो-
भाले बालकुमुद्वती-पतिभृतश्चन्द्रः प्रवालप्रभः ॥

वर्षावर्णनम् ।

आलिङ्गितो रसधरः सुखदो मनोज्ञः
कामिप्रियश्चपलया कनकाभकान्त्या ।
धत्ते विलासमधिकं नभसो हि यत्र
सोऽयं घनागमऋतुः समयः समेतः ॥ १ ॥

वर्षन्ति नीलजलदा बहुविघ्नकाराः
संकेतवासगमनोत्सुकमानसानाम् ।
दूर्वादलैः शुकनिभैः धरणी सुयुक्ता
संभाति कृष्णवसना नवयौवनेव ॥ २ ॥

नृत्यन्ति बर्हिनिवहाः सुखमञ्जुकेका
आच्छाद्य रम्यगगनं सुभगैः स्वपत्रैः ।
चन्द्राकरैर्नयनहारिगुणैः कलापैः
श्रुत्वा विलासिसुखदां घनघोरगर्जाम् ॥ ३ ॥

नद्यः प्रयान्ति सकलं सलिलैः प्रवेगैः
धूल्या विमिश्रमलदूषितसर्वभागैः ।

प्रभ्रंशयन्त्य इह वै तटजातवृक्षान्
साध्वीतराः प्रियमिव प्रययात पयोधिम् ॥ ४ ॥

धाराहताः कटुरवा बहुलम्बकण्ठ
पङ्कार्द्ररम्यवदना दशनैर्विहीनाः ।
कुर्वन्ति शब्दमधिकं नयनाभिरामाः
मण्डूकबन्धुनिवहा नदसन्निधाने ॥ ५ ॥

वायुः कदम्बतरुसर्जसुवासमिश्रः
संचालयन् कमलकेतककर्णिकारान् ।
शीतो घनाघनकणैः सुखयन् मनांसि
मन्दं प्रयाति सहकामपरायणानाम् ॥ ६ ॥

कृष्णागुरुप्रचुरचन्दनलिप्तदेहाः
न्यस्तार्जुनप्रसववासितकेशपाशाः ।
श्रुत्वा ध्वनिं घनमुचां सभया रजन्याम्
गृह्णन्ति कान्तवदनं त्वरया रमण्यः ॥ ७ ॥

संतर्पयन् तरुलताफलपुष्पगुल्मान्
आनन्दयन् युवजनं घनवारिलेशैः ।
संतापितां प्रखरसूर्यगभस्तिजालै
राश्वासयंश्च धरणीं समयो घनानाम् ॥ ८ ॥

कृषकमानसमोदसमर्पणः जलदवेल्लवल्लीतरुतर्पणः ।
सकललोकमनोरथपूरणः वितरतु त्वरितं कुशलं नृणाम् ॥ ९ ॥

श्रीकालिदासीयमन्तिममैतिह्यम् ।

अथ कदाचित् सर्वेऽपि शंकरबाणक्रीडाचन्द्रप्रभृतयः समेत्य सभायां कालिदासस्य महाराजेन भोजेन क्रियमाणां कृताञ्च सत्कृतिं गौरवं बहुमतिञ्चासहमानाः सन्तः विचिन्त्य भोजभूपालसन्निधाने अस्माभिः प्रबन्धाः लोकलालिता विचित्रपदजटिला दुरवगाहार्थगम्भीरिमाणः बहवः कृतास्सन्ति । तथापि तेषु तत्रभवतः नात्यादरो दृश्यते; कालिदासीयेषु सरसललितार्थप्रचुरेषु बालैरपि सुलभतया विज्ञेयार्थकेषु प्रबन्धेषु परमत्यादरो दृश्यते ।

एवं सर्वत्र नीतिमता राज्ञा समपक्षपातिना भवितव्यमिति नास्माभि र्भवते वक्तव्योऽयः वर्त्तते" इति प्रोचुः ।

तन्निशम्य भूपतिरपि सम्यग्भवन्तोऽब्रुवन् यद्वालैरपि विज्ञेयतयार्थवस्त्व-सहिताः कालिदासीयप्रबन्धा इति तत्सत्यमेव । तथैव खलु भवितव्यं सर्वज्ञेन लोकोपकृतिकरणतत्पराशयेन महाकविना । तत्कृत : तादृशाः प्रबन्धा एव सर्व-जनप्रशस्यमाना भवेयुरित्यत्र न कोऽपि विशयलेशः । भवद्भिः कृताश्च प्रबन्धाः बुधजनानामेव मनोविनोदकारिण इतीयानेव भेदः मयावगतः । इति प्राह ।

तदा च ते सर्वे तथा यदि वयमिदानीं एकां समस्यामर्पयामः ताञ्च स कालिदासः पूरयतु । यदि तां स पूरयेत् तर्हि तत्कृतेषु प्रबन्धेष्वपि अस्माकं बहुमतिर्भवदीयवचनजातेष्वपि विश्वस्तत्वं भवेदिति निगद्य "क ख ग घ" इति चतुरक्षरात्मकं समस्यात्वेन जगदुः ।

तदात्वे च यदृच्छया स कालिदासोऽपि तां सभामागत्य भोजेन तदा विधिवत्सत्कृतः समुपाविशत् । तदा च राजा तैर्दत्तां समस्यां पूरयितुं तं कालिदासं न्ययुङ्क्त । स च महाकविः क्षणं ध्यात्वा समालोचनपरोऽभवत् । तदा च शब्दब्रह्ममयी लोकमाता दयावारिधिर्वाग्देवी स्वांशावतीर्णस्य कवेः साहित्य-करणविलम्बमसहमाना करधृततालपत्रायाः कस्या अपि बालिकाया रूपं धृत्वा तदीयलोचनातिथिरभवत् । स च कविः तादृशीं तां बालिकां दृष्ट्वा "रण्डे ! किमिति एतावन्तं कालं मां साहित्यकरणे विलम्बितवत्यसी"ति रोषेण भाव-यित्वा तदनन्तरं झटिति सभायां—"का त्वं बाले काञ्चनमाला कस्याः पुत्री कनकलतायाः"॥ किं वा हस्ते तालकपत्रं का वा रेखा क ख ग घ ॥" इति प्रश्नोत्तररूपतया तां समस्यां पूरयामास ॥

तां दृष्ट्वा सर्वेऽपि कवयः महाराजोऽपि अतीवाश्चर्यभरितान्तरंगाः परां कोटिमानन्दस्याविन्दन् ॥

एवं द्वित्रेषु वत्सरेषु गतेषु कालिदासः शरीरास्वास्थ्येन विलासवती-भवनान्तर एव भिषग्भिश्चिकित्स्यमानः भोजभूपेनापि यथावसरं गत्वा दृश्य-मानश्चाभवत् । परन्तु भोजसभागमनादिकस्य शक्तिमान् स नाभवत् । एवं स्थिते कदाचित् ज्योत्स्नानिशीथिन्यां स भोजभूपतिस्सोल्लासं स्वदयितया लीलादेव्या सह सौधे संलापादिकं कुर्वाणः तन्मुखसौन्दर्यदर्शनसन्तुष्टस्सन् एवं पादद्वयम् आनुष्टुभं जगाद—"कुसुमे कुसुमोत्पत्तिः श्रूयते नहि दृश्यते" इति । उत्तरार्द्धं

न तदा तस्य मुखाद्विरमत् । ततः परं परेद्युः तत्समस्यापूरणाय समागतान् बाणादिकवीन्नियोजयामास—ते च तत्पूरयितुं न प्रबभूवुः ।

ततश्च स राजा एतां समस्यां यः पूरयति, तस्मै स्वराज्यार्द्धं ददामी''ति आघोषणपूर्वकं राजगृहे घंटामर्गिञ्च बन्धयामास । तद्वृत्तं कर्णाकर्णिकया निशम्य सा विलासवती राज्यलाभलोभेनाक्रान्तचित्ता कालिदासे निद्राति तत्समीपभित्तौ भोजगदितं पूर्वार्द्धं विलिख्य निजकार्यव्यग्रा तस्थौ । तदन्तरे स कालिदासः प्रबुध्य सर्वत्र विलोकमानः भित्तिगतं तत्पूर्वार्द्धं दृष्ट्वा विहस्य क्षणेन, "बाले तव मुखाम्भोजे दृष्टमिन्दीवरद्वयम्" इति विचार्य तदधस्स्वयं विलिख्य पुनरपि निद्रां गत आसीत् ।

ततश्च सा विलासवती निजकार्याणि कृत्वा यदा कालिदासान्तिकमाजगाम तदा स निद्राण एवादृश्यत । तद्भित्तिगतं पूर्वार्द्धमुत्तरार्द्धसहितं विलिखितं निरूप्य प्रमुदितहृदया सती "यद्ययमत्र जीवन् तिष्ठेत् तर्हि आत्मना कृतमुत्तरार्द्धमिति वक्तुं न युज्येत । तस्मादेनं हत्वा क्वचित् कुत्रापि प्रक्षिप्य राजगृहं गत्वा उत्तरार्द्धं निगद्य तस्माद्राज्यार्द्धं गृह्णीयामिति समालोच्य, खड्गेन खण्डशः कालिदासं कृत्वा तदंगखण्डांश्च निजगृहस्यान्धकूपे प्रक्षिप्य प्रच्छाद्य च स्वयं प्रहृष्टचेता राजगृहं गत्वा तत्रस्थं घण्टामर्गिं स्वयमेवाघोषयत् । तदा च द्वास्थाः राजसन्निधौ विलासवतीसमागमनं व्यजिज्ञपन् । तदा च क्षणेन भूपेनाकारिता सा तत्पुरतः तदुत्तरार्द्धं स्वकृतमिति कथयित्वा कालिदासप्रोक्तमेव जगाद ।

स च सर्वज्ञो भूपतिरपि तदुत्तरार्द्धं श्रुत्वा कालिदासस्मरणसमाविष्टचेताः "अयि विलासवति! स जीवन् वर्त्तते उत न वा" इति परं पप्रच्छ । सा च यथावृत्तं स्वसमीहितञ्च तस्मै न्यगदत् । ततश्च स राजातीव विषण्णचेतास्स्वयं कतिपयभटैस्सह विलासवतीगृहं तदैव गत्वा तस्मादन्धकूपात् तदंगखण्डान् निरवशेषं संगृह्य, सन्धानकरणी विशल्यकरणी मृतसञ्जीवनीप्रभृति दिव्यमूलिकाप्रयोगबलेन तद्दिन एव तं कालिदासं पुनरजीवयत् ।

स च सुप्तोत्थित इव प्रबुद्धः कालिदासः विषण्णमानसं राजानं अधोमुखीं विलासवतीञ्च विलोक्य "किमर्थमहमुज्जीवितोऽस्मि मित्रेण प्रभुणा भवता? मम एवमेव स्त्रीकरादेव जीवत्याग इति पुरातनवृत्तादेवमभवत् । मा त्वमत्र विलासवतीकृतविषये वा मम जीवत्यागे वा विषीद । अहमुज्जीवि-

सोऽप्यत्र मुहूर्त्तमात्रमेव तिष्ठेयम्। भवदभिलाषः कथ्यतामि"ति सानुरागं भोज-भूपतिमभिजगाद। स च राजा तदा "भवतो यथाचन्द्रार्कं शरीरं विनापि शाश्वती कीर्त्तिः प्रबन्धरचनादिभिर्विद्यते तद्वन्ममापि कीर्त्तिः शाश्वतिका भूया-दित्येतेन विचारेण तादृशमनुपद्दं प्राप्तुमेवं व्यवसितवानस्मी"ति अभणत्।

तन्निशम्य च स कविः "तर्हि श्रीरामचरितं पद्यरूपेण भवान् करोतु; अहं भवत्साहाय्यार्थं गद्यरूपेण कुर्याम्; स च प्रबन्धः भवन्नाम्नैव भुवि प्रथतां; तेन प्रबन्धेन भवतोऽपि शाश्वती कीर्त्तिः सम्मतिश्च भूयादि"ति, तन्निशम्य स भूपतिः तथा भवत्विति मनसि कृत्वा रामचरितं पद्यरूपेण चकार, तत्साहाय्याय गद्यरूपेण च कालिदासः चकार, एवं कुर्वतो रामचरितं तयोः सुन्दरकाण्डस्समा-प्तिमगमत्। ततश्चासन्नकालगतिस्स कालिदासः" इतः परं पञ्चषाधिमिषानेव जीवेयम् अस्य प्रबन्धस्य "भोजचम्पू" चम्पूरामायणमिति नाम भवेत्। एतावतैव भवान् कृतार्थोभूयादिति निगद्य स्वप्राणान् जहौ। तदा स राजा तेनैव कृतार्थः तादृशमित्रविरहेणातीवखिन्नमानसः तस्यौर्द्ध्वदेहिकादिकाः क्रियाः स्वयमेव निर्वर्त्य पश्चात्स्वयं तेन विना भुवि स्थातुमपारयन् सर्वत्र विरक्तचित्तः निजपुत्रस्य जयपालनामकस्य हस्ते निजराज्यधुरां निवेश्य लीलादेव्या सह विपिनं प्रविश्य योगबलेन स्वतनुत्यागं कृत्वा सद्गतिं दयितासहितः प्रपेदे।

(क्रमशः।)

भ्रमराष्टकम्।

लोभाद् भ्रान्तिस्ततोऽविपत् ततो जडत्वं जायते इत्याह—

गन्धाढ्यासौ भुवनविदिता केतकी स्वर्णवर्णा,
पद्मभ्रान्त्या क्षुधितमधुपः पुष्पमध्ये पपात।
अन्धीभूतः कुसुमरजसा कण्टकैश्छिन्नपक्षः,
स्थातुं यातुं द्वयमपि सखे नैव शक्तो द्विरेफः॥ १॥

असन्तुष्टचेतसामितश्चेतश्च धावतां कीदृशी अवस्था जायते तदाह—

गन्धाढ्यां नवमल्लिकां मधुकरस्त्यक्त्वा गतो यूथिकां,
दैवात्ताञ्च विहाय चम्पकवनं पश्चात् सरोजं गतः।

बद्धस्तत्र निशाकरेण विधिना क्रन्दत्यसौ मूढधीः,
सन्तोषेण विना पराभवपदं प्राप्नोति मूढो जनः ॥ २ ॥

अल्पवित्ता जना यदा धनवन्तो भवन्ति तदा पूर्व्वबान्धवाननादृत्य गुरु-शूनाद्रियन्ते । अतो लोकाः शत्रुमित्रज्ञानरहिता इत्याह–

येऽमी ते मुकुलोद्गमादनुदिनं त्वामाश्रिताः षट्पदाः,
ते भ्राम्यन्ति फलाद्बहिर्बहिरहो दृष्ट्वा न सम्भाषसे ।
ये कीटास्तव दृक्पथञ्च न गतास्ते त्वत्फलाभ्यन्तरे,
धिक् त्वां चूततरो परापरपरिज्ञानानभिज्ञो भवान् ॥ ३ ॥

सर्व्वगुणसम्पन्नेन श्रेष्ठजनेनापि दैववशात् हीनजनः सेव्यते इत्याह–

नीतं जन्म नवीननीरजवने पीतं मधु स्वेच्छया,
मालत्याः कुसुमेषु येन सततं केलीकृता हेलया ।
तेनेयं मधुगन्धलुब्धमनसा गुञ्जालता सेव्यते,
हा धिक् दैवकृतं स एव मधुपः कां कां दशां नो गतः ॥ ४ ॥

भ्रान्तिमतो जनस्य कुत्रापि शान्तिर्नास्तीत्याह–

पलाशकुसुमभ्रान्त्या शुकतुण्डे मधुव्रतः ।
पतत्येव शुकोऽप्येनं जम्बुभ्रान्त्या जिघांसति ॥ ५ ॥

असम्भवद्वस्तु प्रति लोभो न कर्त्तव्यः, तत्र तु लोभे कृते केवलं निराशत्वमेव गच्छति तस्मादाह–

दृष्ट्वा स्फीतोऽभवदलिरसौ लेख्यपद्मं विशालं,
चित्रं चित्रं किमिति किमिति व्याहरन् निष्पपात ।
नास्मिन् गन्धो न च मधुकणा नास्ति तत् सौकुमार्य्यं,
घूर्णन् मूर्द्धा बत नतशिरा व्रीडया निर्जगाम ॥ ६ ॥

यः स्वदेशे क्षीरघृतादिकञ्च न प्रार्थयति स विदेशे व्यञ्जनहीनं पर्य्युषितान्नमपि बहुमन्यते इत्याह–

अलिरसौ नलिनी वनवल्लभः,
कुमुदिनीकुलकेलिकलारसः ।
विधिवशेन विदेशमुपागतः,
कुटजपुष्परसं बहु मन्यते ॥ ७ ॥

सुखं चिन्तयतां जनानामेतत् स्मर्त्तव्यं यत् दैवं सहसा जीवनं हर्त्तुं शक्नोतीत्याह—

रात्रिर्गमिष्यति भविष्यति सुप्रभातं,
भास्वानुदेष्यति हसिष्यति पङ्कजालम् ।
इत्थं विचिन्तयति कोषगते द्विरेफे,
हा हन्त हन्त नलिनीं गज उज्जहार ॥ ८ ॥

इति भ्रमराष्टकं समाप्तम् ।

पाश्चात्यशिक्षाफलम् ।

प्रातरारभ्यानिशं वृष्टिरपतत् तस्माद्धेतो रामहरिदासोऽनतिविलम्बेन सेवाद् गृहं प्रत्यावर्त्तत । बहिर्गेहे वस्त्रपरिवर्त्तनं कृत्वा दक्षिणालिन्दे पीठं पातयित्वा च तदुपरि समुपाविशत्, शीतलाम्बुकणयुक्तवात्यया तस्य नग्नकलेवरमतिशयं विव्यधे । ईषत्तापयुक्तो भवितुं, ताम्रकूटसत्कारे मनो न्ययुङ्क्त । गृहिणी मोहिनी सूच्या सहसस्यानच्छिन्नवस्त्रखण्डसमूहेन कन्थासीवनं कृतवती, धैर्य्यरक्षणार्थं सानुनासिकं ग्राम्यपदावलीमालोचितवती च । भर्त्तुः कण्ठशब्देन चकितचित्ता सा उत्थाय ताम्बूलं प्रस्तोतुमारेभे । यदा ताम्रकूटधूमपानाद्रामहरेः ईषन्मत्तभावोऽजायत तदा ताम्बूलकरङ्कहस्ता गृहिणी तत्सन्निधान समागच्छत् । वृद्धः सहासमुवाच "अद्य कस्मादयमनुग्रहः"? गृहिणी सप्रकाशमनुकृतवती सस्मितं कटाक्षं विक्षिप्य रामहरेर्दूरे समास्ते स्म । एतेन रामहरिरेतदबुध्यत यदद्य गृहिण्याः काचित् नूतनकथास्ति । सर्व्वत्र शान्तिलक्षणं दृष्ट्वा मोहिनी स्वामिनं प्रत्युक्तवती । बहुदूरदेशे यत्र स कृष्णहरिः प्रवसति; तद्भुवने मुद्राप्रेरणानन्तरमेतावत्कालपर्य्यन्तं तस्य कोऽपि संवादो नायाति ।

एतद्ग्रामस्य विद्यालयशिक्षकसमीपं गत्वा "स शिक्षकः कृष्णहरेः किञ्चिदपि विवरणं जानाति किंवा" एतत् ज्ञात्वा त्वया शीघ्रं प्रत्यागम्यताम् ।

रामहरिरुवाच । पत्रादिलेखनात् विना केनोपायेन तत्संवादो लभ्येत ? वृथा शिशुकसमीपगमनम् ? कृष्णाहरिरधुना कस्यापि समीपे पत्रं न प्रेरयामास । अतस्त्वं शान्ता भव । कृष्णहरिं प्रति पत्रप्रेरणकारणादद्य द्विवसत्रयावधि मध्यमकर्त्तारं साधयामि, स तु लब्धावसरोऽपि न भवति । तथा कृष्णहरेरपि किमभवत्तच बुध्यते । अर्थप्रयोजनं विना कदापि न लिपिं प्रेरयामास । कलिकातानगर्य्यांचिवसतस्तस्य वित्तं पाषाणात्व माप्तम् । पित्रोरावयोर्हृदयेन पुत्रविरहव्यथा कीदृशी अनुभूयते स तत् कस्मात् बुध्यते । एतच्छ्रुत्वा मोहिनी दीर्घं निःश्वस्य "यातु तत् श्वः किल त्वयावश्यमेव वत्सस्य समीपे लिपिः प्रेरयितव्या । वत्सो मम विदेशे तिष्ठति, तत्र तु मातृतुल्यः कोऽपि नास्ति । मच्चित्तचियतममङ्गलमाशङ्कते । वत्सो मासत्रयं यावत् मम दृष्टेरगोचरत्वं गतः । एवं दम्पत्योरालापे प्रचलति बहिरङ्गनात् राजनियुक्त-लेखहारः "भ्राता रामहरे गृहे विद्यसे कि"मिति समाजुहाव । रामहरिरपि "तिष्ठा-मी"त्युक्त्वा व्यस्तचित्तः बहिराजगाम । स पत्रवाहकस्तस्मै चतुष्कोणावरण-युक्तं पत्रमेकं प्रदाय तत् परिवर्त्तेन सबलं ताम्रकूटधूम माकृष्य मुखाद्विर्गमयन् प्रययौ । हस्तलिपिमवलोक्यैतत् कृष्णहरेः पत्रमिति रामहरिरनुमाति स्म । ततो वृद्धस्तूर्णं मध्यमकर्त्तुः गृहं प्रत्यधावत् । मध्यमकर्त्ता यदुवन्द्योपाध्याय आवरणमुन्मुच्य तल्लिपिमुच्चैः पपाठ—"पितः । त्वत्प्रेरितं मुद्राशतं प्रापम्, तन्मुद्राभिः प्रथमोपाधि—(बि, ए,) परीक्षायाः शुल्कं वेतनादिकञ्च मया दत्तम् । अधिकन्तु एतत् कथयामि प्रथमोपाधिपरीक्षात उत्तीर्णः सन्नहं द्वितीयो-पाधिम् (एम्, ए,) लिप्सुरध्येतुमिच्छामि । तत्र प्रतिमासं चत्वारिंशन्मुद्रापरिमितो व्ययो भविष्यति । त्वन्तु एतावन्तमधिकमर्थं दातुं समर्थो भविष्यसीति नाहं विश्व-सिमि । तत एतत्स्थानीयोच्चविचारालयव्यवहारजीवश्रीयुक्तदीननाथविश्वासस्य दुहित्रा सह ममोद्वाहसम्बन्धनिर्णयमकरवम् । आगामिनि फाल्गुनपञ्चमदिने विवाहो भविष्यति । विवाहदिने त्वमायातुं शक्ष्यसि किंवा तदहं त्वया ज्ञाप-यितव्यः । श्वशुरो मे सर्व्वं पाठव्ययं दातुं स्वीचकार । इति

"कृष्णहरिः ।"

एतल्लिपिमर्म्मोद्धृत्य लिपिं प्रगृह्य विषण्णवदनो रामहरिरालयमाययौ । तस्य विषादपूर्णमास्यं विलोक्य मोहिन्युत्कण्ठितचित्ता पतिमपृच्छत् स्वामिन् वत्सस्य कृष्णहरेः संवादं शीघ्रं ब्रूहि । सुदीर्घं निःश्वस्य वृद्धोऽवदत्—अपरम्वा किम्भविष्यति पाश्चात्यशिक्षाया नूनं फलमेतत् । स स्वयमेव स्वकीयोद्वा-

दृढसम्बन्धं स्थिरीचकार । हृदये उच्चाशां संधृत्य तनयमहं कृतविद्यं कर्त्तुं चेष्टित-
वान् । निदाघतपस्करं प्रावृड्वर्षणञ्च शिरसि कृत्वा मासि मासि पञ्चविंशतिं
मुद्राः प्रेरितवानहम् । वार्द्धक्येऽस्मिन्नभङ्गप्रयोगिपरिश्रमस्योपयुक्तपुरस्कारोऽयम् ।
एषा भविष्यदाशास्मन्मनसि समजनि यत् पुत्रोपार्ज्जितेन अर्थेनाक्लेशं संसारयात्रां
निष्पाद्य पुत्रवधूपरिचर्य्यया ससुखं जीवनातिवाहनं करिष्यामि । हा जगदीश्वर !
तस्यान्तु वज्रपातमकार्षीः । कृष्णहरिर्व्यवहारजीवकन्यां परिणयति । अधुनास्मान्
दरिद्रश्रमजीविनो विना अन्यत् किमपि नावधारयिष्यति । भो विधातस्त्वन्मनसि
एतद्विद्यते? एवमालप्य वृद्धे विरते मोहिनी उच्चैश्चक्रन्द । ततः क्रमेण बहुकालो
गतः । कृष्णहरेरपरं कमपि संवादं तौ न प्रापतुः । रामहरिरपि न पुत्राय संवादं
प्रेरयामास, वृद्धस्य मनसि भावः कीदृशो जातस्तच्च जाने । एतदनुमीयते यत्स मनसि
प्रतिज्ञातवान् एतादृशपुत्रेण सह कमपि संस्रवं नाहं पालयिष्यामि । जननीहृदये
तु प्रबोधो नायाति । तस्मात्सा गूढं कृष्णहरेरुदन्तमनाययत् । तस्योद्वाहोऽभवत् ।
श्वशुरोऽपि भूषणादिभिर्न्यूनातिरिक्ताः पञ्चसहस्रमुद्रास्तस्मै ददौ । कृष्णहरिरपि
परीक्षोत्तीर्णो भूत्वा कस्मिंश्चिद्वाणिज्यागारे सार्द्धशतमुद्राभृतिलभ्यं कोषाध्यक्षपदं
प्राप्तवान् । स तु भ्रान्त्यापि मातापित्रोर्व्वार्त्तां न जग्राह । पुत्रोद्वाहपत्रप्राप्तिका-
लाद्रामहरिरुदासीन इव संसारे अतिष्ठत् । तस्य सयत्नपालितचूतोद्याने नास्त्ये-
वाग्रहः । क्षेत्रं तृणकण्टकादिभिः क्रमशः परिपूर्णं सत्शस्योत्पादनशक्तिहीन-
मभूत् । अहो अधुना स कथं परिश्रमं करिष्यति । एक एव पुत्रः ।
तेन सहापि सम्बन्धो विगतः । मासिकमुद्राप्रेषणादूर्ध्वेण शतमुद्राः ऋणयित्वा
कृष्णहरेराद्योपाधिपरीक्षासमये प्रेरितवान् । तत्परिशोधनचिन्तया वृद्धः क्रमे-
णोत्कटमानसिकव्याधिग्रस्तोऽभूत् । आत्मप्रमादात् यदाननं सर्व्वदा प्रफुल्लमा-
सीत् तत् शनैर्विवर्णत्वं प्राप । चक्षुषी च विलं गते । दुःखेन क्षोभेण च षण्मासा-
भ्यन्तरे रामहरेर्व्बलिष्ठशरीरं जीर्णत्वमगच्छत् । श्रमनिरतो रामहरिः शय्याश्रयं
लेभे । मर्म्मान्तिकपीड़या यत् प्रतिज्ञातं तदतीव भीषणं वृद्धस्य रुजा क्षीयमाणस्यापि
अर्थाभावाच्च यथारीति चिकित्साभवत् । रोगयन्त्रणाया असह्यायामपि कृष्णहरिं
न ज्ञापयति स्वामवस्थां वृद्धः । एवं गच्छति क्रियति काले वृद्धस्यान्तिमकाल आगत-
प्राय इत्यनुभूय मोहिनी भृशं व्याकुलतां गता । अर्थाभावादुत्तमर्णसकाशे ऋणं प्रार्थि-
तवत्यपि विफलमनोरथाऽभूत । यदा प्रचुराणि शस्यानि तस्या गृहे आसन् तदा
यदि ऋणं प्रार्थयिष्यत् तर्हि उत्तमर्णोऽवश्यमेवार्थमदास्यत् । किन्तु सम्प्रति
हीनावस्थतया "प्राक् यदर्थमगृहीस्तद्दातुं क्षममपि न प्राप्नोमि; पुनरर्थः कथं प्रार्थ्यते?

अस्मानर्थद्रुमान् मन्यसे किम्" इत्युक्त्वा उत्तमर्णास्तां वितारिडतवान्। हतमनोरथा सा गृहं प्रत्याहृत्य सङ्गोपनेन कृष्णहरेः समीपं प्रेरितवत्येकं पत्रम्। तत्पत्रं प्राप्य गृहगमनाय पत्नीं अनुमतिं ययाचे। तत्पत्नी तु "हेमन्ते पल्ली जीर्णप्लीहज्वरेण समाक्रान्ता भवति ; एतस्मात् कारणात् तव गृहगमनं न कर्त्तव्यम्" इत्युक्तवती। पत्नीवचनात् पितृदर्शनविरतः सोऽर्थादेशनियमेन दश राजतीः मुद्राः प्रेर्य्य तत्-पत्रनिम्ने "दत्तचिकित्सकमाहूय" इति लिलेख। दुरदृष्टक्रमेण तदर्थः रामहरिहस्तेऽपतत्। वृद्धस्तदर्थं प्राप्तिमात्रेण दरिद्रेभ्यो ददौ। ततो गच्छति काले वृद्धो रामहरिर्दिवं ययौ। अपरन्तु कृष्णहरिः कलिकातायां सानन्दं दिनमतिवाहितवान्। विलासिनो व्यसनासक्तस्य च जनस्य कलिकातानगर्य्यां मासिकसार्द्धशतमुद्रया वासोऽसम्भवः। श्वशुरो वा कति धनानि दास्यति। अतः वाणिज्यागारकोषोऽर्थ-शून्यत्वं क्रमशः प्राप। बहुकालो नागच्छदेवम्। पञ्चशतमुद्राचौर्य्यापराधात् कृष्णहरी राजद्वारे प्रभुना वणिजाभियुक्तः श्वशुरकृपया मुक्तिं लेभे। श्वशुरस्तु व्यवहारजीवः। अपि च दीननाथः कोपनस्वभावः। गृहे चौरपोषणं व्यवसायक्षति-करमिति मत्वा जामातरं बहुशस्तिरस्कृतवान्। सर्व्वमपि सहनीयं; श्वशुरालय-गञ्जना तु सर्व्वथाप्यसहनीया। तत एकदा कृष्णहरिरपि श्वशुरं प्रति कठोरवचः प्रयुक्तवान्। श्वशुरोऽपि स्पष्टभाषया एतदुवाच "अज्ञकमसच्चरित्रञ्च जामा-तरमहं न प्रार्थये, मुहूर्त्तेन त्वं मद्गृहाद् दूरीभव"। एतच्छ्रुतवतः कृष्णहरेः शिरोघूर्णनं जातम्। आकाशं पातालञ्च विचिन्त्य किमपि स्थिरीकर्त्तुं न शशाक। क्षणः स क्षिप्त इवाभवत्। ततः 'पुनर्मूषिकरूपेण' जनन्या जन्मभूमेश्च क्रोड़-माश्रयितुं कलिकातां परितत्याज।

शीतकालः। समयोऽपराह्णः। अभ्रंलिहवनस्पतिपल्लवादीनि हेममण्डितानि च कृत्वा दिनकरोऽस्तमितप्रायः। सुविस्तीर्णप्रान्तरे स्वर्णवर्णमसृणशस्य-गुच्छोपरि शीतलवायुः प्रवहति। एवं काले रामहरिगृहसम्मुखे पाश्चात्यवे-शभूषापरिधायी उपनेत्रावृतनयनः कश्चित् विलासी जनः परिदृश्यते पल्लीवा-सिभिः। परिचयेन तं सर्व्वे कृष्णहरिमित्यवगच्छन्ति। बहिःप्राङ्गणे स्थितः स सयत्नरक्षितमधिवेशनगृहं लताकुञ्जशोभितं क्षुद्रकुसुमोपवनं किमपि न ददर्श। तत्परिवर्त्तेन जीर्णपर्णसमाच्छादितं भग्नकुटीरमपश्यत्। तत्कुटीराभ्यन्तरे क्षीणवर्त्तिदीपः क्षीणमालोकं विकिरति। गृहकुट्टिमे छिन्नकन्थोपरि मृतकल्पा मोहिनी रोगयन्त्रणया पुनः पुनर्व्विलुण्ठति। कृष्णहरिर्द्वारसमीपं गच्छन् मातरिति जननीं सम्बोध्य तत्सन्निधाने उपविशति स्म। पुत्राह्वानश्रवणाद्वृद्धा पुलकिता

सती चट्टुष्टिमुन्मील्य शिहिततनयक्रोडे शिरः संस्थाप्य मोहिनी स्वामिसकाशं ययौ । सूर्य्येण सह तस्या जीवनसूर्य्योऽपि अस्तं गतः । आकाशे सूर्य्यः पुनरुदेष्यति । किन्त्वहो ! मोहिन्या जीवनसूर्य्यस्तु न पुनरुदेष्यतीति ।

सुदर्शनोपाख्यानम् ।

चतुर्थोंऽशः ।

(संस्कृतभारतीद्वितीयभागस्य ९५ पृष्ठतोऽनुवृत्तम्)

अथ काशीपतिः सुबाहुः स्वकन्यकाया वाक्यमनुसृत्य सुदर्शनाय तां वैवाहिकविधिना सम्प्रदातुं कृतनिश्चयः मध्याह्ने आभ्युदयिकादिकं यथाविधि समाप्य रात्रौ सुगुप्ते गृहे समालङ्कृतां तां राजसुतां यथोचित सम्प्रदानविधिना सुदर्शनाय सम्प्रददौ । ततो वधूवरौ कुशण्डिका-लाजहोमादिकं सर्व्वं कुल-गोत्रोचित-विधिना समाप्य निकाम प्रेमयुतौ बभूवतुः । तदा राजा अश्वयुक्त-रथानां शतद्वयं, सुभूषितानां गजानाञ्च शतं, दासीशतं सर्व्वायुधैर्युक्तं दाससहस्रं, दिव्यानि वासांसि, रत्नानि, रम्याणि वासगृहाणि च यौतुकत्वेन वराय ददौ । सुदर्शनजननी मनोरमाऽपि राज्ञा यथायोग्यं सुष्ठु सम्मानिता ।

प्रातः काशीराजवेश्मनि वाद्यमानान् तूर्य्यनिनादान् शङ्खस्वनान् विविधं गीतध्वनिञ्च निशम्य सर्व्वे नृपाः सुदर्शनेन शशिकलायाः वैवाहिकेन विधिना पाणिग्रहणं कृतमिति ज्ञात्वा परमं रोषान्विता बभूवुः । तदा काशीपतिः स्वसुहृद्भिः सह सर्व्वान् नृपान् भोजनार्थं निमन्त्रयितुं गत्वा तानुवाच "भो महान्तो भूपालाः ! किं करोमि, मम कन्यकया असौ सुदर्शनो वृतः । महद्भि-र्दयाशीलैर्भवद्भिः शमः कार्य्यः, सर्व्वैर्भोजनार्थं मम गृहमागन्तव्यम् ।"

क्रोधयुक्ता नृपतयः प्रत्यूचुः—"अहो अस्माभिर्य्यथेष्टं भुक्तमद्य, स्वानि स्वानि गृहाणि गच्छामः, त्वं स्वगृहं गच्छ ।"

संविग्नमानसे सुबाहौ स्वगृहं गते महीपालाः सर्व्वे सुदर्शनं हत्वा बलेन कन्यकां ग्रहीतुं मन्त्रयित्वा नगरमार्गमवरुध्य अवतस्थिरे । राजा दूतमुखात् तद्वार्त्तां निशम्य सातिशयं दुःखितो बभूव, तदवलोक्य सुदर्शनः स्वश्वशुरमुवाच "भो राजन् निर्भयो भूत्वा अस्मान् भरद्वाजाश्रमाय विसृज दुर्मतिभ्यो नृपेभ्यो भयं नैव करोमि, जगदम्बाप्रसादात् सर्व्वानहं विजेतुं शक्नोमि ।" तदाकर्ण्य स राजा नवोढ़या पत्न्या सह रथसंस्थितं सुदर्शनं विससर्ज्ज ।